CC0,In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ र्द० ॥ श्री [illegible] ॥ श्रीमद्धर्मसमुद्रनंदनवरः सद्बुद्धरत्नाकरः स्रसेव्यो विमलोज्वलः सुखकरो
लोकप्रकाशप्रदः । उद्यद्धीवलनद्रमाधवनुतश्रीपादपद्मद्वयो यो यूयं नमतादराकृतधियस्तं नेमिचंद्रं स
दा ॥ १ ॥ क्षपणसारशास्त्रस्य नांदीसूत्रव्याख्यानमिदं ॥ श्रीमद्धर्मसमुद्रनंदनवरः सप्तांगराज्यलक्ष्मीविशिष्ट
कृत्स्नधर्मराज्यच्युतसमुद्रविजयप्रियपुत्रः सद्बुद्धरत्नाकरः परमप्रकर्षप्राप्तपरमावगाढसम्यक्त्वकेवलज्ञा
नयथाख्यातशुद्धचारित्रलक्षणरत्नानामुत्पत्तिस्थानभूतः । स्रसेव्यः । गणधरकुलिशधरफणींद्रधरचक्रधरप्र
मुखनरपुंडरीकाणामाराध्यः । विमलः द्रव्यभावात्मकघातिचतुष्टयरहितः । उज्वलः । रूपेण कांत्या माहात्म्ये
न च त्रैलोक्येप्यतिक्रांतोपमः उपमातीतः । सुखकरः तत्त्वोपदेशनद्वारेण सहजशारीरमानसागंतुकानि चतु
र्विधदुःखानि निवार्य नमानामभ्युदयनिःश्रेयससुखस्य कर्त्ता । लोकप्रकाशप्रदः । केवलज्ञानदिवाकरक
रनिकरेण विनेयजनस्वांतध्वांतसंतानं निराकृत्य सकलपदार्थयाथात्म्यस्य प्रकाशकः । उद्यद्धीवलनद्रमा
धवनुतश्रीपादपद्मद्वयः विवेककरीभूतात्मांपयत्पन्नकृतवंदकतया वर्त्तमानबलदेववासुदेवाभ्यां स्तुतश्रीपा
दकमलयुगलः । यः तं नेमिचंद्रं नेमिनाथतीर्थकरं कृतधियो यूयं सुखमंगलकरणप्रतिघातयो यूयं स २

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षपणासा० वंदितश्रीपादपद्मयुगलः तंनेमिचंद्रं एवंविधं नेमिचंद्राचार्यं कृतधियः [illegible] वर्णोद्दत्तचित्ताः श्रोतृजन १
२ :यूयमादरात निर्भरनम्रा सदा सर्वकालं नमत वंदनां कुरुत। वंडुणस हृश्लेषाक्ष इति तत्परेपि अयं सूत्रा
र्थः संबंधनीयः॥ तद्यथा॥ श्रीमद्धर्मसमुद्रनंदनवरलक्ष्मीरत्नादिविशिष्टवस्तून्विदधानस्य जलधेः तत्रवर्याः
संघरत्नाकरः सागरवर्द्धकः सम्यक् नक्षत्रादिदेवनिकायस्याराध्यः विमलः क्षीरवाराशिवीचिनिचयसंक २
सकलाकलापपरीतः उज्ज्वलः संतापनिराकारणशीतकरणादिगुणैः सदृशः सुखकरः सकलकुवलयस्य
रनंदकरः लोकप्रकाशप्रदः भुवनप्रकाशकः उज्ज्वलनक्षमाधवनुतश्रीपादपद्मद्वयः निखिलदेशस्थोत्कृ
ष्टछिस्थानीय [illegible]नीकविराजितः वसंतराजपूजितश्रीपादारविंदद्वंद्वः यः तंनेमिचंद्रं ईदृशगुणं तं लोक
यात्रारथप्रवर्त्त[illegible]चंद्रं कृतधियो यूयं श्रीमंतो भवंतः सदा सर्वकालं आदरात्‌ नमत लोकोपकारीति स्तुतिं कुरुत
एवमुपेयतत्वं नमस्कृत्योपायतत्वस्य कृतिधारणस्य [illegible] स्वस्याधिकारनिर्देशकरणार्थं द्वितीयं मंगलसूत्रमाह॥
करणक्षासवशा[illegible]कृत्य विधेईशात्स्वद्वंद्वांतरात्परितः संक्रमणादपूर्वजनितात्मोदस्य वादश्रुतेः करारूपानु
नवाकृत्याद्वत्तिलिखातस्य योगस्य यः परमात्मा तं जिनलब्धिसंपदुदयस्तं नौमि तत्सिद्धये॥२॥ करणक्षासवशात २

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दावेद्यवंदकभावपर्यंतं तावदादरादर्ज्जितया नमता नमस्कारं कुरुत एवंविधं हरिकुलतिलकभूतं नेमिनाथ
स्वामिनं शास्त्रकारः स्वयं निर्झरभक्त्यानमन् यूयमपि नमस्कृत्य कृतार्था भवतेति भव्यजनान्प्रेरितवानित्यर्थ
शास्त्रकारस्य गुरुं नेमिचंद्रसैद्धांतचक्रवर्त्तिवंदनारूपेणाथवा मंगलसूत्रं व्याख्यानं कर्त्तव्यं ॥ तद्यथा ॥ यः श्रीमद्भ
र्मसमुद्रनंदनवरः स्याद्वादलक्ष्मणलक्ष्मीजन्मावासभूतविशिष्टसम्यक्त्वनिरतिचारस्वाचारित्रसकलशास्त्र १
र्थसार्थपरिच्छेदनपटिष्ठविमलज्ञानरूपरत्नानामुदयस्याकरभूतः सन्नेमः । विबुधजनपूज्यः विमलः अनव
रतपरमागमभावनासुधासागरावगाहप्रक्षालितात्मीयकलिकलुषमलपंकसंदोहः अचलः कविगमकिवा
दिवाग्मितागुणैरद्वितीयः सुखकरः मिथ्यावाद्यपायनिराकरणेन सम्यक्त्वाद्युपायप्रदर्शनेन समस्तजन
स्य हितकरः लोकप्रकाशप्रदः श्रुतज्ञानप्रबलप्रभाकरप्रभूतप्रभावेन जनस्य सर्वपदार्थानां करतलाम
लकवद्दर्शकः उयधीवलसद्माधवेन्दोः । सूत्रखंडात्मकसिद्धांतार्थधारणप्रतिपादनसमर्थमतिबलविशिष्ट
गुणोत्कृष्टमाधवचंद्रमुनिना पंचांगमंत्रबृहस्पतिसमानबुद्धियुतभोजराज्यसाम्राज्यसमुद्धरणसमर्थवाङ्
बलयुक्तेरानादिगुणोत्कृष्टमहामात्यपदवीलक्ष्मीवल्लभवाङ्कवलिमहाप्रधानेन नवानुतश्रीपादपद्मद्वय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

क्षपणासा॰ तः अपूर्वजनितादितिपदेनापूर्वस्पर्धककरणाधिकारो ज्ञापितः मोहस्य बादरकृतेरितिपदेनाश्वकर्णकर

२ णाधिकारः प्रकाशितः कृशरूपपदेन कृष्टिकरणाधिकार उद्योतितः अनुभवादितिपदेन कृष्टिवेदनाधिका

रः शंसितः ऽरितघातस्य कृयादितिपदेन ज्ञानावरणादिकर्मक्षपणाधिकारः प्रकटितः योगस्य कृयाद्वेति

पदेन योगनिरोधकरणाधिकारः प्रदीपितः ... अथ संक्षेपादस्मि

क्षपणाविधिर्नतिचारित्रमोहस्य मोक्षाय मुमुक्षूणामस्मिन्ननिरधिकारे ... अथ मंगलकरणानंतरं अस्मिन्

रत्निरधिकारे चारित्रमोहस्य क्षपणाविधिर्मुमुक्षूणां सर्वकर्मनिर्मूलनार्थं मुनिजनानां मोक्षाय स्वरू

पप्राप्तिलक्षणमोक्षसंसिद्धेर्निमित्तं संक्षेपात् संक्षेपरूपेण वक्ष्ये प्रतिपादयिष्ये इत्यनेन शास्त्रकारस्य संबंधा

ना४ भिधेयप्रयोजनं प्रतिपादितं अत्रपूर्वमेव करणमसदामंत्रप्रभावेन सप्तप्रकृतिविकृतसदर्पसर्पविघाटनं कृ

त्वा क्षायिकसम्यक्त्वाख्यमहानिधिं स्वीकृत्यैकविंशतिसत्त्वकर्माणि भूत्वा जघन्येनांतर्मुहूर्त्तमध्ये उत्कृष्टेन वांतमु

हूर्त्तसमधिकाष्टवर्षन्यूनपूर्वकोटिद्वयाधिकत्रयस्त्रिंशत्सागरोपमप्रमाणकालमध्ये चारित्रमोहक्षपणार्हविशु २

द्धिपरिणामो भूत्वा प्रमत्ताप्रमत्तपरावर्त्तनसहस्राणि कृत्वा उज्वलतपःप्रबलकलितः सम्यग्ज्ञानसेनानायकाधि

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इंद्रियाणांस्वस्वविषयेभ्योनावर्त्तस्ववशीकरणवशात् क्रम[illegible]शात्अष्टकषायादिक्षपणाक्रमविधान
करणात्प्रवृत्तांतरात् भेदविज्ञानसंपत्तियुक्तांतरात्मावलंबनात्मोहनीयस्यपरमाणूनांवाहकृतेःप्रवाह
रूपेणप्रवर्त्तमानेतरकर्म्मसमूहस्यपरमाणूनां पूर्वंडुनितात्परितःसंक्रमणात्अस्मिन्नवसरेपूर्वंतयोत्पन्नगु
णसंक्रमणादिसंक्रमणैःपरस्परसंक्रमणात् क्षयरूपानुभवात्प्रतिसमयमशुभकर्म्मानुभागस्यानंतगुण
हीनतयाऽनुभवनात् उदितजातस्यसकलकर्म्मणोयोगस्यमनोवाक्कायलक्षणयोगस्यक्षयाच्चयःपरममुनि
:लब्धिसंपदुदयः नवकेवललब्धीनांपरमकर्षाधिष्ठितोऽभूत्वापरमात्माजनि अनेनक्षपणाविधानक्रमेणाप
रात्मपदेऽधिष्ठितःतस्मिन्विधये तत्परमात्मपदप्राप्तिनिमित्तं तेनोऽपि एवंविधंपरमात्मानंनमस्करोमि।अत्रकरण
पदेनाधःप्रवृत्तापूर्वानिवृत्तिकरणनामाधिकारत्रयंनिरूपितं स्ववशादितिपदेनबंधापसरणनामाधिकार
द्वयंनिगदितं क्रमपदेनक्रमकरणाधिकारोभणितः क्षयविधेरितिपदेनाष्टकषायषोडशप्रकृतिक्षपणा
धिकारःसूचितः देशादितिपदेनदेशघातिकरणाधिकारःकथितः प्रवृत्तांतरादितिपदेनांतरकरणाधिका
रोज्ञापितःपरितःसंक्रमणादितिपदेननपुंसकवेदादिकर्म्मप्रकृतिबंधायुक्तकरणसंक्रमणाधिकारोह्नि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ध्रवाम्योगेष्वेक [illegible] विधकाययोगे [illegible] रिककाययोगएव कषायः [illegible] तिचेत् संज्वलनेष्व [illegible] ए
कः स्रवर्द्धीयमानएव विशुद्धि [illegible] र्द्धेर्विलक्षवात् उपयोग [illegible] तर वक्रमुनिसंमत [illegible]
देशोनश्रुतज्ञानोपयोगएव अस्मिन्पक्षेदर्शनोपयोगोनास्ति अन्योपदेशेनतुमतिश्रुतज्ञानोपयोगयोरेकः च
क्षुरचक्षुर्दर्शनोपयोगयोरप्येकः लेश्याकीदृशीभवेत् प्रवर्तमानशुक्ललेश्यैव वेदः कीदृशोभवेत् भावापेक्ष
यात्रिष्वेकः द्रव्यापेक्षयातुपुंवेदएव [illegible] काणिवापुव्वबंधाणिकेवाअं
सेणिबंधदि कदियावलियंपविसंतिकदिण्हंवापवेसगो काणिवापुव्वबंधाणितस्मिन्चारित्रमोहक्षपणाप्रारंभके
मद्दामुनौकानि कीदृशानिपूर्वबद्धानिप्रकृतिस्थित्यनुभागप्रदेशभेदेनपूर्वबद्धकर्म्माणिसत्वेनवर्तंतइतिचेत् प्र
पितसप्तप्रकृतिनरकतिर्यग्देवायुष्केभ्यः शेषाणांसर्वेषामपिप्रकृतिसत्वंभवति तत्र आहारकतदंगोपांगतीर्थक
रत्वानिभजनीयानिसत्वप्रकृतिषुमनुष्यायुष्यादन्यासांस्थितिसत्वंअंतःकोटीकोटिप्रमाणं अनुभागसत्वमप्रश
स्तानांद्विस्थानिकंप्रशस्तानांचतुःस्थानिकंप्रदेशसत्वंअजघन्यानुत्कृष्टमेवसंभवतीतिज्ञातव्यं केवाअंसेणिबंध
दि वाशब्दोत्रप्रश्नार्थःतेनसोभगवान्चतुर्विधबंधभेदेनबध्यमानाः कर्मप्रकृतीःकेनकीदृशेनअंशेनविभागेन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

ष्ठितः सम्युज्ज्वलचारित्रमहाह्रदविराजितः महाव्रतछत्रध्वजवाहनसहितो गुप्तित्रयांगरक्षकरक्षितः धैर्यवरखंडरी
कमंडलीमंडितः शुक्ललेश्यापरिणामचारुचामरव्यजनवीजितः दयामयवज्रकवचवर्म्मितः सद्गुणदृढमार्गणा
तिशयधर्म्मसंयोजितः सुविशुद्धध्यानचक्ररत्नालंकृतो मूलप्रतिपक्षकर्म्मनिर्म्मूलनदक्षोपेण यथाख्यातशुद्धचा
रित्रराज्यसाम्राज्यैकाधिपत्यस्वांगीकरणार्थं क्षपकश्रेणिदिग्विजयाभिमुखस्वयं [illegible] १५
तर्मुहूर्त्तकालावच्छिन्नाधःप्रवृत्तापूर्वानिवृत्तिकरणपरिणामान् क्रमेणादत्ते तेष्वधःप्रवृत्तकरणपरिणामस्य प्रथमस
मयमादिं कृत्वा चरमसमयपर्यंतमनंतगुणविशुद्धिः अंतर्मुहूर्त्तेनांतर्मुहूर्त्तेन स्थितेरपसरणप्रशस्तापसरत्वबंधनलक्ष
णबंधापसरणं संख्यातसहस्राणि अप्रशस्तकर्म्मणां प्रतिसमयमनंतगुणहीनद्विस्थानानुभागबंधः प्रशस्तक
र्म्मणां प्रतिसमयमनंतगुणवृद्धः चतुःस्थानानुभागबंधश्चेति चत्वार्यावश्यकानि कुर्वतः सातिशयाप्रमत्तमुनिराजस्य
विशेषलब्धिप्ररूपणार्थं चत्वारि गाथासूत्राण्यवतारितानि॥ तत्र परिणामादिविशेषलब्धिप्ररूपणार्थं प्रथमगा
थावतारः॥ कसायक्खवणाढवगो परिणामो केरिसो हवे जोगो। कसाय उवयोगो लेस्सा वेदो य को हवे॥ चारित्रमोह
क्षपणाप्रारंभके परिणामः कीदृशो भवेदिति चेत् अतिशुद्धः योगः कीदृशो भवेत् चतुर्विधमनोयोगेष्वेकः चतुर्वि

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

तीतिज्ञातव्याएवंप्रदेशावंधःप्ररूपितःकदियावलियंपविसंतिकथंकर्म्माणिउदयावलिंप्रविशंतीतिचेत्मूल
प्रकृतयःसर्वाअप्युदयरूपेणउत्तरप्रकृतयःउदयानुदयरूपेणाकदिएहंवापवेसगोकियंतिकर्म्माण्युदीर
णारूपेणोदयावलिंप्रवेशयतीतिचेत्असातवेदनीयमनुष्यायुर्वर्जितस्वमुखोदयसर्वकर्म्माणिच॥७॥वंधव्यु
च्छित्यादिविचारनिमित्तंतृतीयगाथावतारः॥केयंसेझीयदेउदयबंधेणउदयेणवा॥अंतरंवाकहिंकिच्चाकेकेसं
कामगोकहिं॥पूर्वकानिकर्म्माणिबंधेनउदयेनवाविनश्यंतीतिचेत्स्त्यानगृद्धिःनिद्रानिद्राप्रचलाप्रचलाऽसातंमि
थ्यात्वंद्वादशकषायाःअरतिःशोकःस्त्रीवेदंनपुंसकवेदःसर्वायूंषिपरावर्त्तमानाऽशुभनामानि३०मनुष्यगत्यौ
दारिकशरीरतदंगोपांगवज्रवृषभनाराचसंहननमनुष्यगतिप्रायोग्यानुपूर्व्यातपोद्योतरहिताशुभनामानिनीचै
र्गोत्रंचेतिप्रकृतयोवंधतोव्युच्छिन्नाःपरावर्त्तमानाशुभनामानिकानीतिचेत्नरकतिर्यग्गत्येकेंद्रियद्वींद्रियत्रींद्रियचतुरिं
द्रियजातिपंचसंस्थानपंचसंहनननरकतिर्यग्गतिप्रायोग्यानुपूर्व्याप्रशस्तविहायोगतिस्थावरसूक्ष्माऽपर्याप्तसा
धारणशरीरास्थिराशुभदुर्भगदुःस्वरानादेयायशस्कीर्त्तयइतिधानिस्त्यानगृद्धिनिद्रा२प्रचला२मिथ्यात्वसम्यग्मिथ्या
त्वसम्यक्त्वप्रकृतिद्वादशकषायनरकतिर्यग्देवायुर्नरकतिर्यग्देवगतितदानुपूर्व्यत्रिसैकविकलेंद्रियजाति नीद्रिय४
५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निबध्नातीतिचेत् तत्सम्यग् मंदद [illegible] उपशामक [illegible] दप्रतिषिध्यमानुयदार्थमुच्यते॥
ज्ञानावरणीयपंचदर्शनावरणीयसातवेदनीयचतुःसंज्वलनपुंवेदहास्यरतिभयजुगुप्सोच्चैर्गोत्रपंचांतरायसप्त
सप्तविंशतिः नामकर्मणि तु देवगतिपंचेंद्रियजातिवैक्रियिकतैजसकार्मणशरीरसमचतुरस्रसंस्थानवैक्रियिकां कौ*
गोपांगवर्णगंधरसस्पर्शदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्र सभतमट
य* त्येकशरीरस्थिरशुभसुभगसुस्वरादेययशस्कीर्तिनिर्माणनेदेनाष्टाविंशतिः ताश्चतीर्थकरत्वेनसहिता एकान्नत्रिं
शत् आहारकशरीरतदंगोपांगसहिताः त्रिंशत् तीर्थकराहारकद्वययुक्ता एकत्रिंशत् प्रकृतयो बध्यंतेऽस्या
मुपशामकादिविशेषावशेयः। एवं प्रकृतिबंधो निरूपितः बध्यमानप्रकृतीनां स्थितिसर्वासंख्यातगुणहीनांतःकोटी
कोटिस्थितिं बध्नाति एवं स्थितिबंधः कथितः प्रकृतिषु प्रशस्तानां विस्थानुभागमनंतगुणहीनतया अप्रशस्तानां ना*
चतुःस्थानानुभागमनंतगुणितया बध्नाति एवमनुभागबंधो भणितः प्रकृतीनामजघन्यानुत्कृष्टप्रदेशं बध्ना
ति। तासु प्रचलानिद्राहास्यरतिभयजुगुप्सा देवगतितत्प्रायोग्यानुपूर्वीवैक्रियिकशरीरतदंगोपांगाहारक
द्विकसमचतुरस्रसंस्थानप्रशस्तविहायोगतिसुभगसुस्वरादेयतीर्थकरत्वानां कथंचिदुत्कृष्टप्रदेशमपि बध्ना २

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

थमसमये वर्त्तमानस्य स्थितिकांडि[...]कप्रमाणं जघन्यं पल्यसं[ख्या...]भागमात्रं उत्कृष्टं तु तदालापं तथापि जघन्यात्
संख्यातगुणं अत्र जघन्योत्कृष्टकांडके[...]भेदद्वयोर्भवतीति चेत् [...]दर्शनमोहं क्षपयित्वोपशमश्रेणिमा[...]सा
वतीर्य चारित्रमोहक्षपणे क्षपको जातः अन्यः कश्चिद्दर्शनमोहं क्षपयित्वोपशमश्रेणिमनारुह्य चारित्रमोह
क्षपणाभिमुखो जातः तौ द्वौ चारित्रमोहक्षपको प्रथमसमये वा पूर्वकरणगुणस्थानं प्रथमसमयं प्रविष्टौ तयो
र्मध्ये य उपशमश्रेणिमनारुह्यागतः तस्य स्थितिसत्वकर्म संख्यातगुणं उपशमश्रेणिं स्थितिकांडकघा
तकरणाभावात् य उपशमश्रेणिं चटित्वागतः तस्य स्थितिसत्व कर्म संख्यातगुणहीनं तत्र वक्रः स्थितिकांड
तै४ कघातैर्घातितत्वात् यस्य संख्यातगुणहीनं स्थितिसत्वकर्म तस्य प्रथमस्थितिकांडकात् संख्यातगुणं स्थितिसत्व
कर्मणः प्रथमस्थितिकांडकं संख्यातगुणितं कांडकानां स्थित्यनुसारित्वात् एवं तद्द्वितीयकांडकाद्द्वितीयकांड
कं संख्यातगुणं तृतीयात्तृतीयं संख्यातगुणं सर्वस्मिन्नपूर्वकरणकालेऽनेन क्रमेण व्याप्तिं नयेत् यावच्चरम
कं४ स्थितिकांडकात् चरमस्थितिकांडकं संख्यातगुणं तावत् इदं स्थितिकांडकस्वरूपनिरूपणं अनुभागकांड
कघातः कथमिति चेत् अप्रशस्तकर्मणामनंतबहुभागमात्रमनुभागकांडकलांछितं अप्रशस्तकर्मणाम ६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

वैक्रियिकशरीरतदंगोपांगाहारकशरीरतदंगोपांगवज्रर्षभनाराचवर्जितषट्संहननमनुष्यगतिप्रायोग्यानु
ना४ पूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारणपर्याप्तदुर्भगादेयायशस्कीर्तितीर्थकरत्वनीचैर्गोत्र एफद्यतो कच्छिन्नानि
अंतरं वा॥ अंतरकरणं कृतः कदिक्कत्र किंवा कुर्वाके के केषां केषां कर्म्मणां कद्विकस्य मध्ये संक्रामगो संक्रामको॥
स्तीति चेत्॥ अनिवृत्तिकरणकालसंख्यातवहुभागानतीत्यांतरकरणं संक्रमक्रियां च करोती त्येस्मिन्नवसरे नक
रोतीत्ययं परिहारः॥ छ॥ स्थित्यनुभागनिरूपणनिरूपणनिमित्तं च अर्थगाथावतारः॥ केट्टिदीयाणि कम्माणि अणु
भागेसु केसु वा उक्कट्टिदूण सेसाणि कवाणपडिवज्जदि॥ केहिदीयकम्माणि काइशि स्थितिविशेषवर्त्तमानकर्मा
णि कांडकघातेनापवर्त्य शेषस्थानकीद्धारमयतीति प्रश्नः॥ अनेन स्थितिकांडकघातः सूचितः॥ अणुभागेसु केसु वा
कीदृशानुभागे वर्त्तमानकर्म्माणि उकट्टिदूण कांडकघातेन हत्वा सेसाणि कमाणपडिवज्जदि॥ शेषस्थानकीद्धान
यतीति प्रश्नः॥ अनेनानुभागकांडकघातो गणितः॥ अध प्रवृत्तकरणे स्थित्यनुभागकांडकघातो नास्ति अपूर्वकरणे
तद्घातोस्तीति परिहारः॥ छ॥ अधः प्रवृत्तकरणस्वरूपनिरूपणसूत्रं॥ यत्राधस्तननावानां वैसदृश्यस्थितेः समाभ्यस्
तदधःप्रवृत्तकरणं गुणनामयुतं विनिर्दिष्टं॥ इत्यधःप्रवृत्तकरणं समाप्तं॥ अनंतरकृणोऽपूर्वकरणं प्रारादहितितस्य

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नास्ति॥ इत्यनंतरोक्तक्रमं तावन्नयेद्यावदंतर्मुहूर्तकालं प्राप्य प्रथमसमयलब्धस्थित्यनुभागकांडकं समाप्नो
ति॥ तदनंतरसमये घातितशेषानुभागस्यानंतबहुभागमात्रमन्यदनुभागकांडकं लब्धं स्थितं इदानीमनुभा
गसत्त्वं कांडकघाततोऽनंतगुणहीनमस्तीति प्रथमसमयनिरूपणतः इदानींतनिनिरूपणायानेदोज्ञा
तव्यः प्रथमस्थितिकांडकोत्करणकालेऽनेनक्रमेणसंख्यातसहस्रानुभागकांडकानि नीत्वा तन्नरम्य द
नुभागकांडकं प्रथमस्थितिकांडकमपूर्वकरणप्रथमसमयप्रारब्धस्थितिबंधश्चेति त्रयं युगपदेव समाप्त
एवं स्थितिबंधसहस्राणि नीत्वा अपूर्वकरणकालं समानतया सप्तभागीकृत्य तत्र प्रथमसप्तमभागे गते नि
द्राप्रचलयोर्बंधव्युच्छित्तिः बंधव्युच्छित्तिस्थाने एव निद्राप्रचले स्वजातीयबध्यमानचक्षुरचक्षुरवधिकेवल
दर्शनावरणेषु गुणसंक्रमेण संक्रमयति॥ इतः परं स्थितिबंधसहस्रेषु गतेषु अपूर्वकरणस्य षट्सप्तम
भागचरमे देवगत्यासह बंधयोग्यनामकर्मणां बंधव्युच्छित्तिः परभविकनामकर्माणि कानि कानी
ति चेत् देवगतिपंचेंद्रियजातिवैक्रियिकतैजसाहारककार्मणशरीरसमचतुरस्रसंस्थानवैक्रियिकाहा
रकांगोपांगवर्णगंधरसस्पर्शदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासप्रशस्तविहायोगति ७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नुभागकां घातो नास्ति पल्यासंख्यातैकभागो बंध सृतः सर्वबंधमान वृत्तिकरणचरमसम
ये स्थितिबं पल्यासंख्यातैकभागं हीनमिच्छा बंधमपूर्वकरण इत्यर्थः उद
यावलिबाह्ये गलितावशेषगुणश्रेणिः क्रियते तद्गुणश्रेण्यायामः अपूर्वानिवृत्तिकरणसूक्ष्मसांपरायक्षी
णकषायकालात् समुदितात् विशेषाधिकः अधिकप्रमाणं क्षीणकषायकालसंख्यातैकभागमात्रं यान्यप्रशस्त
कर्माणि बंधवर्जितानि तेषां गुणसंक्रमणं करोति बंधरहिताशुभकर्मप्रदेशान् बंध्यमानस्वजातीयकर्मस
घे प्रतिसमयं संख्यातगुणितक्रमेण स्वभावांतररूपेण निक्षिपतीत्यभिप्रायः स्थितिसत्त्वं स्थितिबंधश्च सागरोप
मकोटिलक्षपृथक्त्वमस्ति अंतःकोटीकोट्यां वर्त्तते बंधतः सत्त्वं संख्यातगुणं एवं स्थितिकांडकघातानुभागकांड
कघातः स्थितिबंधापसरणगुणश्रेणिगुणसंक्रमणानीदं पंचावश्यकप्रतिबद्धव्याख्यानमपूर्वकरणप्रथमसम
यापेक्षया प्ररूपितं प्रथमसमयावश्यकप्रतिपादनतो द्वितीयसमयावश्यकनिरूपणस्यायं भेदः स्तिसक इति वि
तं प्रथमसमयगुणश्रेणितो द्वितीयसमयगुणश्रेणिनिक्षेपद्रव्यमसंख्यातगुणं प्रतिसमयमसंख्यातगुण
द्रव्यमपकृष्य गुणश्रेणिकरणात् गलितावशेषद्रव्यनिक्षेपः विशुद्धिरनंतगुणा शेषावश्यके न किमपि भेदः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कांडकतः उत्कृष्टस्थितिकांड [illegible] जातमिति [illegible] ततः कारणात्पूर्वोक्तार्थः सु
घटितः प्रथमस्थितिकांडक [illegible] निवृत्तिकरणानां स्थितिकांड [illegible] तेता
वशेषस्थितिसत्वं च समानतयैव वर्त्तते ततः कारणाद्द्वितीयादिस्थितिकांडकानि सर्वेषामपि समानान्येव जत
ति प्राक्तनोतः कोटीकोटिप्रमाणः स्थितिबंधोऽपूर्वकरणकाले संख्यातसहस्रमात्रस्थितिबंधापसरणैर्हीनो भूत्वा
ऽनिवृत्तिकरणप्रथमसमये सागरोपमसहस्रपृथक्त्वं वर्तते प्राक्तनमंतःकोटीकोटिप्रमाणस्थितिसत्त्वमपूर्वक
रणकाले संख्यातसहस्रस्थितिकांडकघातैर्हीनं भूत्वा ॥ निवृत्तिकरणप्रथमसमये सागरोपमलक्षपृथक्त्वप्रमा
णं गलिताविशेषगुणश्रेणिर्गुणसंक्रमणं चापूर्ववदेवप्रतिसमयसंख्यातगुणितया वर्त्तते अनिवृत्तिकरणप्र
थमसमये सर्वकर्मणामप्रशस्तोपशमननिधत्तिनिकाचनालिधानित्रीणि करणानि विनष्टानि सर्वकर्मणां सर्वप
रमाणवः उदयसंक्रमणापकर्षणोत्कर्षणप्रायोग्याः जाता इत्यर्थः अतऊपरि बंधापसरणक्रम उच्यते इत्थंप्रथमसम
यनिरूपितक्रमेण संख्यातसहस्रस्थितिबंधसहितानिवृत्तिकरणसंख्यातबहुभागेषु गतेष्वन्यः स्थितिबंधोऽसं
ज्ञिस्थितिबंधेन समः मोहनीयस्य सागरोपमसहस्र १००० ॥ ४ ॥ चतुःसप्तमभागाः ज्ञानदर्शनावरणवेदनीयांतरायाणां ८ धा.४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

त्रसबादरपर्याप्तप्रत्येकशरीरस्थिरशुभसुभगसुस्वरादेयनिर्माणतीर्थकरत्वानीति त्रिंशत्॥ अत्र परिस्थितिबं
धसहस्रेषतीतेष्वपूर्वकरणगुणस्थानचरमसमयं प्राप्तः तत्र हास्यरतिभयजुगुप्सानां बंधव्युच्छित्तिः षण्णोक
षायाणामुदयव्युच्छित्तिः॥ [illegible] अपूर्वकरण [illegible] प्रकारात्मकं सूत्रं॥ यत्रोपरितनभावानां सर्वदा ध्रुवत्वैः समानाः स्य
[illegible] पूर्वकरणगुण [illegible] कर्म नाम्नाकरं [illegible] समासं॥ छ॥ तदनंतरसमये प्रथमानिवृत्तिकरणं
जातः तत्क्रियमाणावश्यकान्युच्यंते॥ [illegible] प्रथमसमयानिवृत्तिकरणस्यान्यत् स्थितिकांडकं पल्यसंख्याते
कभागमात्रं घातितावशेषानंतबहुभागमात्रमन्यदनुभागकांडकं। अपूर्वकरणचरमस्थितिबंधतः पल्यसं
ख्यातैकभागेन हीनोन्यः स्थितिबंधः। अनिवृत्तिकरणप्रथमस्थितिकांडकं सर्वेषामपि समानमन्यथा वा। प्रथमस्थि
तिकांडकं विषमं जघन्यादुत्कृष्टस्य संख्यातभागाधिकत्वात्। अस्य किं कारणमिति चेत् कश्चित् संख्यातभागाधि
कस्थितिकांडके विषं सत्वकर्माणि नरेन्यः संख्यातभागहीनस्थितिसत्वकर्मा तौ द्वावपि कश्रेण्यां युगपच्चटितौ त
योर्मध्ये संख्यातभागहीनस्थितिसत्वकर्मणः स्थितिकांडकतः संख्यातभागाधिकस्थितिसत्वकर्मणः स्थिति
कांडकमपूर्वकरणप्रथमसमयादारभ्य संख्यातभागाधिकं भवत्यागमप्यनिवृत्तिकरणप्रथमसमये पि जघन्या

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

डीबेसहस्रसागरोपमाणि स्थवंतिसप्ततिकोटीकोटिसागरोपमस्थितिकमिथ्यात्वस्यैकेंद्रियेसागरोपमस्थितौसत्यांच
त्वारिंशत्कोटीकोटिस्थितिकचारित्रमोहस्यकियती स्थितिर्निवर्तिप सा०५०को१फसा१इसा४०को लब्धंसा धुत्रिंशत्कोटि
स्थितिककर्मणः कियती स्थितिः सा: ०५०को१सा१सा२०को१लब्धंसा२ विंशतिकोटीकोटिस्थितिककर्मणः किय
तीस्थितिः सा०५०को१ सा१सा२०को१ लब्धंसा ४ एवंत्रैराशिककरणेएकेंद्रियप्रतिबद्धस्थितिप्रमाणमायाति अनेनक्र
मेणद्वींद्रियादिस्थितिरपित्रैराशिकेकृतेकृतेतत्रतत्प्रतिबद्धचारित्रमोहादिस्थितिप्रमाणमागच्छति सुविशुद्धिक
रणपरिणाममाहात्म्यतो निवृत्तिकरणः एकेंद्रियादिस्थितिवंधसमानस्थितिवंधंकरोति अयंत्रैराशिकक्रमोऽग्रेव
क्ष्माणसत्वापसरणेपियोज्यः एकेंद्रियस्थितिवंधसमानस्थितिवंधतः परंसंख्यातसहस्रस्थितिवंधेषुगतेषुनामगोत्र
योः पल्यमात्रस्थितिवंधः संभवति तस्मिन्कालेज्ञानावरणदर्शनावरणवेदनीयांतरायाणांद्व्यर्धपल्यमात्रस्थितिवंधोभव
ति अत्रचविंशतिकोटीकोटिसागरोपमस्थितिकनामगोत्रयोःपल्यस्थितिवंधस्तदात्रिंशत्कोटीकोटिसागरोपमस्थि
तिकज्ञानावरणादिचतुष्टयस्यचत्वारिंशत्कोटीकोटिसागरोपमस्थितिकमोहस्यचकियास्थितिवंधोभवतीतित्रैरा
शिकंकृत्वाद्व्यर्धपल्य २ मात्रस्थितिवंधद्विपल्यमात्रस्थितिवंधंचसाधयेत् तस्मिन्कालेस्थितिसत्वकर्मकियद्भवतीति ८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[illegible]गरोपमसहस्रत्रिसप्तभागाः [illegible] सागरोपमसहस्रद्वि[illegible]सप्तभागा विकलेषु। अतउपरिसंख्यातसहस्र-
[illegible]स्थितिबंधं बध्नाति चतुरिंद्रियस्थिति[illegible]समानः स्थितिबंधः। अत्र मोहस्य सागरोपमशतं १०० चत्वारः सप्तभागाः ज्ञा-
नावरणादिचतुष्टयस्य सागरोपमशतत्रिसप्तभागाः। नामगोत्रयोः सागरोपमशतद्विसप्तभागौ। अनेन क्रमेण सं-
ख्यातसहस्रस्थितिबंधेषु गतेषु त्रींद्रियस्थितिबंधसमानस्थितिबंधः। मोहस्य पंचाशत्सागरोपमचतुःसप्तभागाः ज्ञा-
नावरणादिचतुष्टयस्य पंचाशत्सागरोपमत्रिसप्तभागाः। नामगोत्रयोः पंचाशत्सागरोपमद्विसप्तभागौ। इतउ-
परिसंख्यातसहस्रस्थितिबंधेषु गतेषु द्वींद्रियस्थितिबंधसमानस्थितिबंधः। अत्र मोहस्य पंचविंशतिसागरोपमचतुः-
सप्तभागाः ज्ञानावरणादिचतुष्टयस्य पंचविंशतिसागरोपमत्रिसप्तभागाः। नामगोत्रयोः पंचविंशतिसागरोपमद्वि-
सप्तभागौ। इतउपरिसंख्यातसहस्रस्थितिबंधेषु गतेषु एकेंद्रियस्थितिबंधसमानस्थितिबंधः। अत्र मोहस्य एकसागरो-
म४ पमचतुःसप्तभागाः ज्ञानावरणादिचतुष्टयस्य एकसागरोपमत्रिसप्तभागाः। नामगोत्रयोरेकसागरोपमद्विसप्तभा- र
गौ स्थितिबंधो भवति। पूर्वोक्तासंख्यादिस्थितिबंधप्रमाणसाधने युक्तिरुच्यते। मिथ्यात्वस्योत्कृष्टस्थितिरेकेंद्रिये एक
सागरोपमं द्वींद्रिये पंचविंशतिः सागरोपमाणि त्रींद्रिये पंचाशत्सागरोपमाणि चतुरिंद्रिये शतं सागरोपमाणि। असंज्ञि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रणद्विकर्म्मणां [illegible] न्तरस्थितिबंधः संख्यातगुणहीनः संख्यातबहुभागाः हीनयित्वावस्थ [illegible] र्थः तस्मिन् का १
लेऽल्पबहुत्व [illegible] स्थितिबंधः स्तोकः [illegible] नावरणा [illegible] द्वित्रकर्म्मणां स्थितिबंधः सं [illegible] गुणः मोहस्थि
तिबंधः संख्यातगुण [illegible] चेत् नामगोत्रयोः [illegible] स्थिति [illegible] संख्यातगुणहीनस्थितिबंध [illegible] गते [illegible]
[illegible] ज्ञानावरणादित्रयस्य पल्यान्तरस्थितिबंध [illegible] मोहस्य पल्यतोधिकस्थितिबंधोऽस्तीति कारणात् अनेना
[illegible] संख्यातसहस्रस्थितिबंधेषु गतेषु मोहस्य पल्यमात्रस्थितिबंधो भवति तदा शेषषण्णामपि कर्म्मणां
पल्यसंख्यातैकभागमात्रः स्थितिबंधो भवति अस्मात् पल्यमात्रसमानस्थितिबंधादनंतरं मोहस्य संख्यातबहुभागान
[illegible] परः स्थितिबंधः पल्यसंख्यातैकभागमात्रः तत्परि सर्वकर्म्मणामपि स्थितिबंधः पल्यसंख्यातैकभागमात्रो जा
यते तस्मिन् काले अल्पबहुत्वमुच्यते नामगोत्रयोः स्थितिबंधः स्तोकः ज्ञानावरणादित्रयकर्म्मणां स्थितिबंधः संख्यात
गुणः मोहस्थितिबंधः संख्यातगुणः कथमिति चेत् अयोग्यप्रवृत्तानि कर्म्मणां बहूनि बंधापसरणानि प्राप्तानि पूर्वपूर्व
मागतकर्म्मणां केषांचित् बंधापसरणानां प्राप्तेः अनेनाल्पबहुत्वक्रमेण संख्यातसहस्रस्थितिबंधेषु गतेषु नाम १०
गोत्रयोः दूरापकृष्टिनामा पल्यसंख्यातैकभागमात्रबंधेषु वरमोऽन्त्या स्थितिबंधः दूरापकृष्टिस्थितिबंधात्परं नामगोत्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चितसागरोपमशतसहस्रपृथक्त्वं तथा ॥ निर्वृत्तिकरणप्रथमसमयसागरोपमशतसहस्रपृथक्त्वतः संख्यातगुण
हीनं तस्मिन्काले अल्पबहुत्वमुच्यते । तद्यथा नामगोत्रयोः पल्यमात्रस्थितिबंधः स्तोकः ततः ज्ञानावरणादिचतुष्टय
स्थितिबंधो विशेषाधिकः ततः मोहस्थितिबंधो विशेषाधिकः एवं पूर्वोक्तेषु स्थितिबंधाल्पबहुत्वं जातमिति न वाच्यं अंतदीपक
त्वेन पूर्वोक्तसर्वस्थितिबंधानामनेनाल्पबहुत्वेनागतमिति यावत् । नामगोत्रयोः पल्यस्थितिबंधाऽनंतरस्थितिबंधः सं
ख्यातगुणहीनः पल्यमात्रस्थितिबंधे संख्यातभागीकृते एकस्माद्भागाद्धीनमिति ज्ञा एकभागस्यैव बंधात् शेषपंचकर्मस्थिति
बंधः पूर्वबंधतो विशेषहीनः पल्यसंख्यातैकभागेन हीनत्वात् तस्मिन्नवसरे अल्पबहुत्वमुच्यते । नामगोत्रयोः स्थितिबंधः स्तो
कः ततो ज्ञानावरणादिचतुर्णां परस्परं समानोपि संख्यातगुणः पल्यसंख्यातैकभागमात्रनामगोत्रस्थितिबंधात् पल्
ता विशेषाधिकस्य संख्यातगुणत्वात् । ततः मोहस्थितिबंधो विशेषाधिकः अर्द्धेनाधिक इत्यर्थः अनेन क्रमेण संख्यात
सहस्रस्थितिबंधे गते तेषु ज्ञानावरणादिचतुष्टयस्य पल्यमात्रस्थितिबंधः तस्मिन्काले मोहस्य त्रिभागाधिकाः ४/३ पल्य
मात्रस्थितिबंधः त्रिंशत्कोटीकोटिस्थितिकज्ञानावरणादिचतुष्टयस्य पल्यमात्रस्थितिबंधस्तदा चत्वारिंशत्कोटीकोटि
स्थितिकमोहस्य किंयान् स्थितिबंध इति त्रैराशिकं कृत्वा त्रिभागाधिकपल्यमात्रं ४/३ स्थितिबंधं साधयेत् अतः परं ज्ञानाव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

अथमपल्यासंख्यातैकभागबंधकालेऽल्पबहुत्वमुच्यते नामगोत्रयोः स्थितिबंधः स्तोकः ततो ज्ञानावरणादित्रि
कस्य स्थितिबंधः परस्परं समानोऽप्यसंख्यातगुणः ततो मोहस्यासंख्यातगुणः अयतनायतनस्थितिबंधतः पूर्व
पूर्वस्थितिबंधोऽसंख्यातगुणः इतीदं कारणं सुमक्तं अनेनाल्पबहुत्वक्रमेण संख्यातसहस्रस्थितिबंधेषु गतेषु त
द्वचरमस्थितिबंधादन्यः स्थितिबंधः युगपन्नामगोत्रयोः स्तोकः मोहस्यान्यस्थितिबंधोऽसंख्यातगुणः ज्ञानावरण १
दित्रयाणामपिऽन्यास्थितिबंधः परस्परं समानोऽसंख्यातगुणः पूर्वं ज्ञानावरणादित्रितयस्थितिबंधादसंख्यातगु
णितत्तया स्थितो मोहनीयस्थितिबंधः इदानीमात्मनो विशिष्टसामर्थ्यसंजनितस्याप्रशस्तत्वाद्विशेषघातं प्राप्यते वा४
तो युगपदेवासंख्यातगुणहीनो जातः अनेनाल्पबहुत्वक्रमेण संख्यातसहस्रस्थितिबंधेषु गतेषु तद्द्वचरमस्थितिबंधा
दन्यस्थितिबंधो युगपदेव मोहनीयस्य स्तोकः नामगोत्रयोरन्यस्थितिबंधोऽसंख्यातगुणः ज्ञानावरणादित्रयाणा
मन्यस्थितिबंधः परस्परं समानः प्राक्तनादसंख्यातगुणः अत्रापि नामगोत्राभ्यां युगपन्मोहस्यासंख्यातगुणहीन
त्वे कारणमप्रशस्तत्वमेव अनेनाल्पबहुत्वक्रमेण संख्यातसहस्रस्थितिबंधेषु गतेषु तद्द्वचरमस्थितिबंधाद्युगप ११
न्मोहनीयस्यान्यस्थितिबंधः स्तोकः नामगोत्रयोरन्यस्थितिबंधोऽसंख्यातगुणः घातित्रयस्यान्यस्थितिबंधोऽसंख्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योः पल्यासंख्यातबहुभागेरपसृतपल्यासंख्यातैकभागमात्रोन्यः स्थितिबंधः तदाशेषकर्मणां पल्यसंख्यातैकभागमा
त्रः स्थितिबंधः तस्मिन्काले ऽल्पबहुत्वमुच्यते नामगोत्रयोः स्थितिबंधः स्तोकः ज्ञानावरणादिचतुर्णामसंख्यातगुणः पल्या
संख्यातैकभागमात्रनामगोत्रस्थितिबंधात्पल्यसंख्यातैकभागमात्रज्ञानावरणादिचतुष्टयस्थितिबंधो ऽसंख्यातगुणः इ
तिसुव्यक्तं ततः मोहस्थितिबंधः संख्यातगुणः ज्ञानावरणादिचतुष्टयस्य मोहस्य चानतिक्रांतदूरापकृष्टित्वात् नामगोत्रयोः
पल्यासंख्यातैकभागमात्रस्थितिबंधानंतरं संख्यातसहस्रस्थितिबंधेषु ज्ञानावरणादिचतुर्णां स्थितिबंधः दूरापकृष्टि
मतिक्रम्य पल्यासंख्यातैकभागमात्रो जातः तस्मिन्काले ऽल्पबहुत्वमुच्यते नामगोत्रयोः स्थितिबंधः स्तोकः ततो ज्ञाना
वरणादिचतुर्णामसंख्यातगुणः ततो मोहस्यासंख्यात [illegible] नामगोत्रयोरसंख्यातगुणहीनस्थितिबंधेषु बहुषु
गतेषु ज्ञानावरणादिचतुष्टयस्य [illegible] ल्यासंख्यात [illegible] स्थितिबंधात् मोहस्याद्या [illegible] ल्पसंख्यातैकभागमात्रस्थि
तिबंधत्वात् ज्ञानावरणादिचतुष्टयस्य [illegible] ल्यासंख्यातभा [illegible] स्थितिबंधनंतरमनेनाल्पब [illegible] त्वेन संख्यातसहस्रस्थितिबंधे
षु अतीतेषु मोहस्यापि पल्यासंख्या [illegible] भागस्थितबंधः [illegible] ति तदा सर्वकर्मणां प [illegible] संख्यातैकभागमात्रः स्थितिबंधः
तदा स्थितिसत्त्वं पागुक्तसागरोपम [illegible] सहस्रपृथक्त्वात् कांडकघाते हीनं भूत्वा सागरोपमसहस्रपृथक्त्वं जायते मोहस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

क्षपणासार पसरणमुच्यते। अनेनक्रमकरणरूपाल्पबहुत्वक्रमेण संख्यातसहस्रस्थितिबंधेषुगतेषु स्थितिसत्त्वंसहस्रसाग
१२ रोपमप्रमाणंऽसंज्ञिस्थितिबंधसमानं। अतःपरंसंख्यातसहस्रस्थितिकांडकेषुगतेषुस्थितिसत्त्वंसागरोपमशतप्रमा
णंचतुरिंद्रियस्थितिबंधसमानंततःपरंसंख्यातसहस्रस्थितिकांडेषुगतेषुस्थितिसत्त्वंपंचाशत्सागरोपमप्रमाणं १
त्रींद्रियस्थितिबंधसमानंततःपरंसंख्यातस्थितिकांडसहस्रेषुगतेषुस्थितिसत्त्वंपंचविंशतिसागरोपमप्रमाणं
द्वींद्रियस्थितिबंधसमंततोऽपसंख्यातसहस्रस्थितिकांडेषुगतेषुस्थितिसत्त्वमेकसागरोपमप्रमाणमेकेंद्रियस्थि
तिबंधसमंस्थितिकांडकसहस्रेषुगतेषुपल्यस्थितिबंधसहस्रेषुगतेषुएतेनैवदोनास्तिस्थितिकांडकोत्करण
कालस्थितिबंधकालयोःसमानत्वात्। अतःपरंसंख्यातसहस्रस्थितिकांडकेषुगतेषुनामगोत्रयोःपल्यमात्रस्थि
तिसत्त्वंतदाज्ञानावरणादिचतुर्णांसार्धपल्यं स्थितिसत्त्वंमोहनीयस्यद्विपल्यमात्रंस्थितिसत्त्वं। अस्मिन्पल्यमात्र
स्थितिसत्त्वेसंख्यातबहुभागमात्रस्थितिकांडकघातेनामगोत्रयोःपल्यसंख्यातैकभागमात्रस्थितिसत्त्वंतदाऽ
ल्पबहुत्वमुच्यते। सर्वतःस्तोकंनामगोत्रयोःस्थितिसत्त्वंज्ञानावरणादिचतुर्णांस्थितिसत्त्वंसंख्यातगुणंपरस्परसमानं
मोहस्यस्थितिसत्त्वंविशेषाधिकं। अनेनाल्पबहुत्वक्रमेणस्थितिकांडकपृथक्त्वेगतेज्ञानावरणादिचतुर्णांपल्यमात्र १२

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तगुणः वेदनीयस्यान्यस्थितिबंधोऽसंख्यातगुणः पूर्वं वेदनीयेन सदृसमानस्थिति विशिष्टतया गतेदानीं घातित्र
यवेदनीयादसंख्यातगुणहीनत्वं प्राप्तं प्रीतित्रा प्रशस्ततरत्वमेव इत्यल्पबहुत्वेन संख्यातसहस्रस्थितिबंधेषु
गतेष्ववरमस्थितिबंधादन्यस्थितिबंधे युगपन्मोहनीयस्य स्तोकः घातित्रयस्यान्यस्थितिबंधोऽसंख्यातगुणः नामगो
त्रयोरन्यस्थितिबंधोऽसंख्यातगुणः वेदनीयस्यान्यस्थितिबंधो विशेषाधिकः पूर्वं नामगोत्रस्थितिबंधादसंख्यातगु
णो घातित्रयस्थितिबंधः इदानीं ततोऽसंख्यातगुणहीनत्वं प्रशस्ततरत्वमेव कारणं अत्र विंशतिकोटीकोटि
स्थितकनामगोत्रयोर्मल्पासंख्यातस्थितिस्तदा त्रिंशत्कोटीकोटिस्थितिकवेदनीयस्य किमिति त्रैराशिकं कृत्वा ना
मगोत्रयोः स्थितिबंधाद्वेदनीयस्थितिबंधस्य विशेषाधिकत्वं साधनीयं एतस्मिन्नवसरे अल्पबहुत्वे बंधस्य क्रमकारणं
जातं क्रमकरणमिति किं नामगोत्रस्थितेर्वेदनीयस्थितिर्यत्राल्पबहुत्वेऽधिकत्वं जातात् तदल्पबहुत्वं क्रमक
रणमित्युच्यते प्रागुक्तवीचापसरणस्यार्थपदमुच्यते तद्यथा पल्यमात्रस्थितिबंधपर्यंतं पल्यसंख्यातेकभागो हानिप्र
माणं पल्यमात्रादिहत्वा दूरापकृष्टिपर्यंतं पल्यसंख्यातबहुभागा हानिप्रमाणं दूरापकृष्टिमादिकृत्वाऽसंख्यातवर्षसह
स्रपर्यंतं पल्यासंख्यातबहुभागा हानिप्रमाणं इयं परिभाषा एवंविधप्रमाणमवापसरणे प्रयोजनीया इतः परं संख्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

यस्य स्थितिसत्वमसंख्यातगुणं वेदनीयस्य स्थितिसत्वमसंख्यातगुणं ततउपर्यनेनाल्पबहुत्वक्रमेण स्थितिकांडपृ
थक्त्वेगते मोहस्य स्थितिसत्वं स्तोकं। नामगोत्रयोः स्थितिसत्वमसंख्यातगुणं घातित्रयस्य स्थितिसत्वमसंख्यातगुणं
वेदनीयस्य स्थितिसत्वमसंख्यातगुणं ततउपर्यनेनाल्पबहुत्वक्रमेण स्थितिकांडपृथक्त्वेगते मोहस्य स्थितिसत्वं स्तो
कं घातित्रयस्थितिसत्वमसंख्यातगुणं नामगोत्रयोः स्थितिसत्वमसंख्यातगुणं वेदनीयस्य स्थितिसत्वं विशेषाधिकं
अस्मिंश्चरमाल्पबहुत्वे सत्वस्य क्रमकरणं जातं अस्मिन्सत्वापसरणे त्रैराशिकक्रमाल्पबहुत्वकारणं विस्तरेण वि
चारप्रमुखात् अशेषविशेषा बंधापसरणवद्वक्तव्याः अपसरत्यत्र बंधनं बंधापसरणं। स्थितिकांडकघातेन सत्वह्रासः स
त्वापसरणं असात्क्रमकरणात्पर[illegible]संख्यातसहस्रस्थितिकां[illegible]संख्यातसमयप्रबद्धोदीरणा त त
[illegible]यो वा असंख्यातलोकप्रति[illegible]तया[illegible]दीरणा स्थिता [illegible] माहात्म्येनानुभूय मामसव
र्गणामपि पल्यासंख्यातप्रतिभागप्रतिबद्धाऽसंख्यातसमयप्रबद्धोदीर[illegible]वर्ततइत्यर्थः इत[illegible]क्षपणाधिकार
प्रारंभः॥ असंख्या[illegible]प्रबद्धोदीरणातः आरभ्य संख्यातसहस्रस्थितिकांडके षतीते अप्रत्याख्यानप्रत्याख्यानक्रो
धमानमायालोभाभिधाष्टकषायाणां संक्रमकोऽभवति। अत्र संक्रमको नाम को भावः क्षपणाप्रारंभक इत्यर्थः सर्वक २३

स्थितिसत्वं। सर्वत्रापि स्थितिकांडकपृथक्त्वेन संख्यातसहस्रस्थितिकांडकमित्यर्थः। पृथक्त्वशब्दस्य वैपुल्यवाचि-
त्वात् तदा मोहस्य त्रिभागाधिकपल्यमात्रं स्थितिसत्वं पल्यसत्वात्परं एकस्मिन्कांडके संपूर्णे जाते ज्ञानावरणादिचतुर्णां पल्य-
संख्यातैकभागमात्रं स्थितिसत्वं तदाल्पबहुत्वमुच्यते नामगोत्रयोः स्थितिसत्वं सर्वतस्तोकं ज्ञानावरणादिचतुर्णां स्थि-
तिसत्वं परस्परं समानं धाकनां संख्यातगुणं ततः मोहस्य स्थितिसत्वं संख्यातगुणं अत उपर्यनेनाल्पबहुत्वेन स्थितिकां-
डकपृथक्त्वे गते मोहस्य पल्यमात्रं स्थितिसत्वं पल्यादूर्ध्वमेकस्मिन्कांडके संपूर्णे जाते सप्तकर्मणामपि पल्यसंख्यातैकभा-
गमात्रं स्थितिसत्वं तदाल्पबहुत्वमुच्यते नामगोत्रयोः स्थितिसत्वं सर्वतस्तोकं ज्ञानावरणादिचतुर्णां स्थितिसत्वं परस्परं स-
मानमसंख्यातगुणं। मोहस्य स्थितिसत्वमसंख्यातगुणं अनेनाल्पबहुत्वक्रमेण संख्यातसहस्रस्थितिकांडकेषु गतेषु
चरमस्थितिसत्वा नामगोत्रयोः स्थितिसत्वं स्तोकं मोहस्य स्थितिसत्वमसंख्यातगुणं ज्ञानावरणादिचतुर्णां स्थितिसत्वं परस्परं
समानमसंख्यातगुणं इत उपर्यनेनाल्पबहुत्वक्रमेण स्थितिकांडकपृथक्त्वे गते युगपदेव मोहस्य स्थितिसत्वं स्तोकं ना-
मगोत्रयोः स्थितिसत्वमसंख्यातगुणं। ज्ञानावरणादिचतुर्णां स्थितिसत्वं परस्परं समानमसंख्यातगुणं। तत उपर्यनेना-
ल्पबहुत्वक्रमेण स्थितिकांडकपृथक्त्वे गते मोहस्य स्थितिसत्वं स्तोकं। नामगोत्रयोः स्थितिसत्वमसंख्यातगुणं। घाति-

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारणं पूर्वोक्तमेवातदयावलिवाह्यसर्वंद्रव्यंसजातीयाविरोधेनपरप्रकृतिषुनिक्षिप्यक्षिपतीत्यर्थः एकविंश
तिमोदऽष्टकषायेषुक्षपितेषुमोहस्यत्रयोदशसत्वकर्माणिभवतिदर्शनावरणनवकेस्त्यानगृद्धित्रयेक्षपितेदर्श
नावरणंषोढासत्वेनतिष्ठतित्रिनवतिनामकर्मसुआयुष्कत्रयोदशकर्मसुविनष्टेषुअशीतिःसत्वेनतिष्ठतिज्ञा
नावरणवेदनीयगोत्रांतरायेषुज्ञानावरकर्मसुकिमपिनविनष्टं एवमष्टकषायषोडशप्रकृतीःक्षपणाधिकारःसम २
प्तः इतःपरंदेशघातिकरणप्रारंभः देशघातिकरणमितिकिं मनःपर्ययज्ञानावरणादिद्वादशप्रकृतीकर्मणाम
नुभागबंधएतावत्पर्यंतंसर्वघातिद्विस्थानानुभागतया आगतस्ताआगच्छतं इतःपरंदेशघातिद्विस्थानेवर्त्तयतीत्यर्थः
तद्यथाषोडशकर्मणांक्रमणोऽपरिस्थितिकांडकसहस्रेषुगतेषुमनःपर्ययज्ञानावरणीयदानांतराययोरनुभागबं
धेयुगपद्देशघातित्वमाप्नोति ततश्चपरिस्थितिकांडकसहस्रेषुगतेषुअवधिज्ञानावरणावधिदर्शनावरणलाभांतरायाणा
मनुभागबंधोदेशघातित्वमापद्यते अतोऽपिस्थितिकांडकसहस्रेषुगतेषुश्रुतज्ञानावरणचक्षुर्दर्शनावरणभोगांतराया
णामनुभागबंधोदेशघातित्वंप्राप्नोति ततश्चपरिस्थितिकांडकसहस्रेषुगतेषुचक्षुर्दर्शनावरणस्यानुभागबंधोदेशघा
तीजातः ततश्चपरिस्थितिकांडकसहस्रेषुगतेषुमतिज्ञानावरणपरिभोगांतराययोरनुभागबंधोदेशघातीजातः अतश्चप २५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म्मस्यपूर्वमष्टकषायक्षपणासंभवेऽप्यद्यासत्तरत्वमेवकारणं। कियताकालेनविनश्यंतीतिचेत् क्षपणाप्रारंभक्षणमा
दिंकृत्वाप्रतिसमयमेकैकांफालिंसंक्रमयन् अंतर्मुहूर्तसमयप्रमाणफालिभिःप्रथमकांडकंसंक्रमय्यतथाद्वितीयकां २
डकमपिसंक्रमय्य अनेनक्रमेणस्थितिकांडकसहस्रैरष्टकषायान्यंत्यसंक्रमणेनक्षपयत्येवंवसंक्रमयतिपरमुखे
नविनष्टाइत्यर्थः एवमष्टकषायाणांचरमस्थितिकांडकेषुमोहराजसेनानायकेषुनिर्मूलंविनष्टेष्वष्टकषायाणांशेष
स्थितिसत्वंकालापेक्षयाआवलिमात्रंजायते निषेकापेक्षयातुसमयोनावलिमात्रंचरमकांडकघातसमयेप्रथम
निषेकस्यपरमुखोदयमुखेनापतमसंक्रमणोदयनात्चरमफाल्यासहसमयोनावलिमात्रनिषेकाः … कथंनवि
नश्यंतीतिचेत् … ष्टनिषेकाणांकांडकघाता … इतउपरिसंख्यातसहस्रस्थितिकांड
… निद्राप्रचला … स्त्यानगृद्धिनरकतिर्यग्गत्येकेंद्रियद्वींद्रियत्रींद्रियचतुरिंद्रियजा … नरकतिर्यग्गति … नुपू
र्व्यातपोद्योतस्थावरसूक्ष्मसाधारणशरीरलक्षणेनषोडशकर्मणांविशेषघातको … कियत्कालेनवि … श्यंतीति
चेत् क्षपणाप्रारंभक्षणमादिंकृत्वास्थितिकांडकपृथक्त्वेनमोहराजप्रतिबल … ख्याभवति तथा … षोडशकर्म य॰
णांचरमस्थितिकांडकेनिपतितितेषांशेषस्थितिसत्वंकालापेक्षयाआवलिमात्रंनि … पेक्षयातुसमयो … वलिमात्रं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पर्यंतमुहूर्त्तमात्रनिषेकान् गृहीत्वांतरकरणं करोतीत्यर्थः। अत्र अंतर्मुहूर्त्तप्रमिताः याः अंतरस्थितयः अंतर
करणनिमित्तमुत्कीर्यमाणास्तासां प्रदेशसमूहमंतर्मुहूर्त्तमात्रफालीः कृत्वा असंख्यातगुणितक्रमेण फालीरुत्कि
रन् तत्प्रदेशानुत्कीर्यमाणस्थितिषु न निक्षिपति तर्हि क्व निक्षिपतीति चेत् यासां प्रकृतीनां समयोनावलिमा
त्रप्रथमस्थितिस्तासामंतरगतद्रव्यं गृहीत्वा उदययुतप्रकृतिप्रथमस्थितौ निक्षिपति समयोनावलिमात्रप्रथम
स्थितियुतप्रकृतयः कतिधा भवंति बंधोदयवर्जिताः केवलवध्यमानाश्च तासु षण्णोकषाया बंधोदयवर्जिताः स्त्री
वेदोदयारूढपक्षे इतरवेदद्वयं बंधोदयवर्जितं स्त्रीवेदोदयारूढपक्षे नपुंसकवेदो बंधोदयवर्जितः पुंवेदः के
वलवध्यमानः नपुंसकवेदोदयारूढपक्षे स्त्रीवेदो बंधोदयवर्जितः पुंवेदः केवलवध्यमानः चतुःसंज्वलने
षु यस्योदयेनारूढस्तत्परिशेषत्रयं केवलवध्यमानं अत्र बंधोदयवर्जितप्रकृतीनामंतरद्रव्यं स्वकीयद्वितीय
स्थितौ न निक्षिपति तासां बंधाभावेनोत्कर्षणक्रियाविषयत्वाभावात् केवलवध्यमानानामंतरद्रव्यं स्वस्वद्वितीयस्थि
तौ इतरवध्यमानद्वितीयस्थितौ वा उत्कर्षणक्रियया निक्षिपति बंधसदृशत्वात् यासां प्रकृतीनां प्रथमस्थितिर्नास्ति तासां २
तत्प्रथमस्थितेरुपरितनस्थितीः याः स्थितयः अंतरनिमित्तमुत्कीर्यमाणास्तत्स्थितिप्रतिबद्धप्रदेशाः सर्वे प्रथम १५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रिस्थितिकांडकद्दथस्केगते वीर्यांतरायस्यानुभागबंधो देशघाती जातः पुरुषवेदसंज्वलनचतुष्कयोर्देशघातिकर
णमत्र कथं नोक्तमिति न वाच्यं तेषां पूर्वमेवसंयतासंयतप्रमत्ताप्रमत्तगुणस्थानेषु देशघातिद्विस्थानानुभागबंधसं
भवात् इतः परमंतरकरणप्रारंभः देशघातिकरणादुपरि संख्यातसहस्रस्थितिकांडकेषु गतेषु अन्यत् स्थितिकांड
कमन्यदनुभागकांडकमन्यः समस्थितिबंधः अंतरस्थित्युत्कीरणं चेति चत्वारि क्रियायुगपत्प्रारभते तत्रांतरकरणं
किं नाम अधः उपरि च स्थितिनिषेकान् मुक्त्वा अंतर्मुहूर्तप्रमाणमध्यमनिषेकानां परिणामविशेषेण अभावकरणं तत्र केषां कर्मणामंत
रं चत्वारः संज्वलननवनोकषायत्रयोदशकर्मणामंतरकरणं भवति मोहवर्जितज्ञानावरणादिसप्तकर्मणामं
तरकरणं कश्चिदपि नास्ति अधः किं यत्स्थितिं त्यक्त्वांतरकरणं करोतीति चेत् उदयवतोः पुंवेदक्रोधसंज्वलनयोरंत
र्मुहूर्तमात्रप्रथमस्थितिं त्यक्त्वांतरकरणं करोति उदयरहितानां शेषैकादशकर्मणामावलिमात्रं त्यक्त्वा पूर्वोक्तेनैकेने
णापर्यंतमुहूर्तमात्रनिषेकानग्रहीत्वांतरं करोति पुंवेदसंज्वलनक्रोधोदयेन क्षपकश्रेण्यारूढं प्रति तद्वयस्यांतर्मुहू
र्तमात्रप्रथमस्थितिर्नियमिता अथवा वेदत्रये एकतमसंज्वलनचतुष्टयेष्वेकतममुदयतीति तयोरुदयेन क्षपकश्रे
ण्यारूढं प्रति तद्वयस्य प्रथमस्थितिमंतर्मुहूर्तमात्रीत्पक्त्वा शेषानुदयकर्मणामावलिमात्रप्रथमस्थितिं त्यक्त्वा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवतिमोहस्यवंधोदयोदारुप्रमाणंतत्काललतामात्रेप्रविष्टातःपूर्ववध्यमानसमयप्रबद्धस्यवंधावल्यनंतरमपकर्षणाव
भलक्षणोदीरणाथथास्वमाबाधवर्त्ततितथाइदानींयानिकर्म्माणिवध्यमानानितेषांवंधक्षणप्रादिंकृत्वाषड्भावलिष्व
गतासुउदीरणास्वनाबाधवर्त्तते।मोहस्यानुपूर्वीसंक्रमणंभवति।तद्यथा।नपुंसकस्त्रीवेदद्रव्यंपुंवेदेसंक्रमयतिहास्य २
षण्णोकषायपुंवेदद्रव्यंसंज्वलनक्रोधेसंक्रमयति।क्रोधद्रव्यंमानेमानद्रव्यंमायायांमायाद्रव्यंलोभेसंक्रमयति।एतानि
कर्म्माणिपरमुखेनविनश्यंतीति।ननुस्वयंलोभस्यसंक्रमणंनास्ति।कुतः।लोभंनसंक्रमणंभवतीतिचेत्।मायादिषुसंक्र
मेणभवितव्यं।तथासतिआनुपूर्वीसंक्रमणस्यविलोमसंक्रमणतयाआयातितत्।कारणात्।एतानिसप्तकरणानि
अंतरकरणानंतरसमयेप्रारब्धानि।तत्रमोहनीयस्यस्थितिवंधापसरणंसंख्यातगुणहीनंभवति।यासांसर्वप्रकृतीनां
तदायुगपत्संख्यातवर्षमात्रःस्थितिवंधः।तत्रवंधापसरणंसंख्यातगुणहीनं।घातित्रिंशद्वर्षमात्रस्थितिवंधमादिंकृत्वास्थि
तिवंधापसरणमंतर्मुहूर्त्तमात्रंयावत्पर्यंतंस्वस्वजघन्यस्थितिबंधस्तावत्पर्यंतं।इतीयंव्याप्तिर्ज्ञातव्या।अंतरकरणानंतर
समयमादिंकृत्वासंख्यातसहस्रस्थितिकांडकेषुगतेषुसंक्रमप्रमाणनपुंसकवेदःसंक्रांतः।नपुंसकवेदक्षपणाक्ष
णमादिंकृत्वासंख्यातसहस्रस्थितिकांडकेषुगतेषुचरमकांडकचरमफाल्यासहसर्वसंक्रमणेननपुंसकवेदंपु १६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थि [illegible]स्थितावंते निक्षिपति प्रथमस्थितिं युतप्रकृतयः कतिधा। केवलोदयमाना बध्यमानोदयमानाश्च। तत्रस्त्रीनपुं
सकवेदौ केवलोदयमानौ पुंवेदश्चतुःसंज्वलनाः बध्यमानोदयमानास्तासामुभयप्रकृतीनां प्रथमस्थितौ स्वकीयांत
रोत्कीर्यमाणद्रव्यमन्यकर्मांतरोत्कीर्यमाणद्रव्यं चापकर्षणक्रियया समस्थिति संक्रमणेनान्यत्र निक्षिपतीत्यर्थः। प्रथ
मस्थितावेव निक्षिपति न द्वितीयस्थितौ। याः प्रकृतयो बध्यमानास्तासामंतराया [illegible] ख्यातगुणितया स्थिता भा[illegible]
तीत्पयाजघन्यनिषेकस्थितिर्द्वितीयस्थितौ। स्थितानामादिं कृत्वा बध्यमानसर्वनिषेकेष्वपि अंतरोत्कीर्यमानद्रव्यमुत्क
र्षणक्रियया निक्षिपति बध्यमानप्रकृतयः का इति चेत् चतुःसंज्वलनपुंवेदाः केवलोदयमानांतरद्रव्यं बंधोदयवत्
क्षेणा[illegible] प्रथमस्थितौ बध्यमानद्वितीयस्थितौ [illegible] निक्षिपतीत्यत्र तात्पर्यं [illegible] कांडकसहस्रेषु गतेषु ते
ष्वन्यद् [illegible] कांडकमंतरोत्कीर्यमाणकालेयः समानः स्थितिबंधः यत्स्थितिका [illegible] अंतरकरणकालः एते सर्वेऽपि
तस्वर [illegible]स्यासमं युगपदेव निष्ठां यांति॥ इत्यंतराधिकारः समाप्तः॥ इतः परं संक्रमणं प्रारभ्यते। अंतरकरणादूर्ध्वं क्रिय
माण [illegible]ः के इति चेत् [illegible] समये नपुंसकवेदस्यायुक्तकरणसंक्रमणो भवति। तद्यथा। नपुंसकवेद
क्षपणायां मोहस्योगयुतो नृत्वावर्तत इत्यर्थः। मोहस्य पल्यासंख्यातभागमात्रः स्थितिबंधोपसत्यसंख्यातवर्षमात्रो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

क्षपणासार०
२७

नामगोत्रयोरसंख्यातगुणः पल्यासंख्यातभागमात्रत्वात् वेदनीयस्य स्थितिबंधो विशेषाधिकः अधिकप्रमाणं त्रैराशिके
न साधयेत्। तस्मिन् क्षणे सर्वकर्मणामपि स्थितिसत्वाल्पबहुत्वं कथं स्यादिति चेत् तस्मिन्काले संख्यातवर्षप्रमा
णं मोहस्थितिसत्वं स्तोकं घातित्रयस्यासंख्यातगुणं पल्यासंख्यातत्वात् नामगोत्रयोरसंख्यातगुणं वेदनीयस्य वि
शेषाधिकं मोहस्य संख्यातवार्षिकं तथापि प्रागुक्तस्थितिसत्वक्रमकरणाल्पबहुत्वक्रमो यावत् वर्त्तते इति तात्पर्यं
एवं सप्तनोकषायसंक्रमकप्रथमसमये स्थितिबंधस्थितिसत्वाल्पबहुत्वमुक्तं। सप्तनोकषायप्रथमस्थितिकांडक
पतनकाले घातितावशेषस्थितिसत्वाल्पबहुत्वं कथमस्तीति चेत् प्रथमस्थितिकांडके संपूर्णे जाते स्वस्वघातकन
स्थितिसत्वात् मोहस्थितिसत्वं संख्यातगुणहीनं संख्यातबहुभागस्य कांडकत्वात् शेषकर्मस्थितिसत्वं स्वस्वपू
र्वस्थितिसत्वादसंख्यातगुणहीनं असंख्यातबहुभागस्य कांडकत्वात् प्रथमस्थितिकांडके संपूर्णे जाते मोहादि
कर्मणामन्यः स्थितिबंधः कथं वर्त्तते। नामगोत्रवेदनीयानां स्थितिबंधः स्वस्वपूर्वस्थितिबंधादसंख्यातगुणहीनः
घातिचतुष्टयस्य स्थितिबंधः पूर्वस्थितिबंधात् संख्यातगुणहीनः। अत उपरि संख्यातसहस्रकांडकेषु अतीतेषु सप्त २७
नोकषायक्षपणाद्धायां संख्यातैकभागे गते नामगोत्रवेदनीयानां स्थितिबंधः पल्यासंख्यातैकभागे लग्नमुक्तासंख्यात

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri
Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

वेदरूपेणापरिणमय्यनाशयतीतितात्पर्यं अमुमर्थमग्रे परमुखेनविनश्यत्स्त्रीवेदप्रमुखसर्वकर्म्मणांयोजये
त्तानपुंसकवेदरूपेणानंतरक्षणेस्त्रीवेदस्यप्रथमसमयसंक्रमकःस्त्रीवेदरूपेणप्रारंभकइतितात्पर्यं तस्मिन्सम
येन्यात्स्थितिकांडकमन्यदनुभागकांडकमन्यःसमस्थितिबंधश्चेतित्रयंप्रारब्धंतत्रापरिसंख्यातसहस्रस्थितिकां
डकेषुगतेषुस्त्रीवेदरूपेणवायांसंख्यातैकभागेगतेज्ञानदर्शनावरणांतरायघातित्रयस्यपल्यासंख्यातैकभाग
त्रस्थितिबंधःसमाप्यसंख्यातवर्षप्रमाणंबध्नाति ततोयसंख्यातसहस्रस्थितिकांडकघातव्यापारेणस्त्रीवेदरूपेणाव
यांशेषबहुभागेषुगतेषु स्त्रीवेदस्यपरसातितावशेषस्थितिसत्वंतत्सर्वंचरमकांडकरूपेणलांछति तस्मिन्कालेऽशे
षकर्म्मणांतात्कालिकप [illegible] संख्यात [illegible] शेषबहुभागान्लांछति तस्मिन् [illegible] कांडकेसं
पूर्णेजाते [illegible] प्रमाणःस्त्रीवे [illegible] जातः द्वितीयस्थि [illegible] तपल्यासंख्यातभागायामस्त्रीवेदचरमकांडकचरमफा
लिक [illegible] द्रव्यविनाशा [illegible] र्थः तदामोहस्यस्थिति [illegible] कियद्वेदिलिचेत् संख्यातवर्षप्रमाणंनवति स्त्रीवेदरू
पेणा [illegible] णसमनोकषा [illegible] प्रथमसमयसंक्रमकः अयुक्तक्रियया रूपेणप्रारंभकइत्यर्थः तदासर्वकर्मणां
स्थिति [illegible] लबहुत्वंकथं [illegible] नोकषायप्रथमसमयसंक्रमकस्यमोहस्थितिबंधःस्तोकः घातित्रयस्यसंख्यातगुणः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

वलिप्रत्यावलिद्वयावशेषे आगालप्रत्यागालौ नष्टौ द्वितीयस्थितिस्थितपरमाणूनामपकर्षणेन प्रथमस्थितिनयनमा
गालः प्रथमस्थितिस्थितपरमाणूनामुत्कर्षणेन द्वितीयस्थितिनयनं प्रत्यागालः तथा सति उदीरणापि विनष्टेति नवा
न विनष्टेति प्रथमस्थितितः उदीरणा प्रवर्त्तते प्रत्यावलितः उदीरणा वर्त्तत इत्यर्थः तदावलिद्वये आवलिं गालयित्वा स
मयाधिकप्रत्यावल्यवशेषे पुंवेदस्य सर्वजघन्यस्थित्युदीरणा भवति उत्कृष्टस्थित्युदीरणा नैव एकस्थितेरेवोदीरणा
प्राप्तेः तस्मिन्समये चरमसमयवेदो भवति उच्छिष्टावलिसंज्ञितप्रत्यावलिमात्रनिषेकाणामनुभवाभावात् तस्मिन्का
ले षण्णोकषायाणां स्थितिसत्त्वं संज्वलनक्रोधे निरवशेषं निक्षिप्यते द्वितीयस्थितौ संख्यातवर्षसहस्रायामेन प्रवर्त्तमानं १
षण्णोक[illegible]चरमफालिं सर्वसंक्रमणेन [illegible] निक्षिप्य नाशयतीति [illegible] पुंवेदं विनष्टं किय
त्स्थितिं [illegible] इति चेत् समयोनद्व्यावलिमात्रनवकबंधसमयप्रबद्धाः पुंवेदस्य [illegible] वशिष्यंते प्रथमस्थिताव
संख्यातसमयप्रबद्धप्रमाणोदयनिषेकाः उच्छिष्टावलिमात्रनिषेकाश्च तिष्ठंति इति द्वितीयस्थितिस्थितसंख्यातसहस्र
वर्षायामं पुंवेदद्रव्यं स्थितिसत्त्वं सर्वं क्रोधसंज्वलने संक्रांतं द्वितीयस्थितौ समयोनद्व्यावलिमात्रनवकबंधसमयप्रब २८
द्धाः कथमवशिष्टा इति चेत् सर्वत्रापि नवकबंधरूपणाकाले बंधावल्यामनुपयति बंधावलावतिक्रांतायां प्रतिसम

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

सहस्रवर्षप्रमाणमाश्रयति। अतः परं संख्यातसहस्रस्थितिकांडकेघते तेषुसप्तनोकषायक्षपणाद्धायासंख्यात
वक्षनागेगते ज्ञानदर्शनावरणांतरायाणां संख्यातवर्षप्रमाणं स्थितिसत्वं। ततोग्रे घातित्रयस्य समाने स्थितिबं
धस्थितिसत्वे गलत्सु नः कानिचित् स्थितिबंधस्थितिसत्वानि संख्यातगुणहीनानि। घातिकर्म्मणां संख्यातवर्षमात्रस्थि
तिबंधस्थितसत्वयोः संभवात्। अघातित्रयस्य स्थितिबंधस्थितसत्वे कथं वर्त्तेते। नामगोत्रवेदनीयानां स्थितिकांडक
पृथक्त्वे स्थितिसत्वमसंख्यातगुणहीनं। एषां कर्म्मणां स्थितिबंधपूर्वैः पूर्वस्थितिबंधात् स्तोकः स्थितिबंधः संख्यातगुणहीनः अ
नेन क्रमेण स्थितिबंधापसरणस्थितिकांडकघातक्रमेण यावत् सप्तनोकषायसंक्रमकचरमस्थितिबंधस्तावद्याहीन
यित सप्तनोकषायसंक्रमकचरमसमये स्थितिबंधः कथं स्यादिति चेत् सप्तनोकषायसंक्रमकचरमसमये पुंवेदस्य
चरमस्थितिबंधोऽष्टवार्षिकः पूर्वं संख्यातसहस्रवर्षप्रमाणं पुंवेदस्य स्थितिबंधः क्रमेण संख्यातगुणहान्या अपसृत्येदानी
मष्टवर्षमात्रः संजातः इत्यभिप्रायः चतुःसंज्वलनानां षोडशवर्षप्रमाणस्थितिबंधोऽस्ति मोहायुर्वर्जितषट्कर्म्मणां संख्या
तवर्षसहस्रप्रमाणस्थितिबंधोऽस्ति सर्वकर्म्मणामपि स्थितिसत्वं कियत्। चतुर्घातिनां संख्यातवर्षसहस्रमात्रं नामगो
त्रवेदनीयानामसंख्यातवर्षप्रमाणं। एवं सर्वकर्म्मणां स्थितिबंधस्थितसत्वप्रमाणं प्ररूपितं। पुंवेदस्य प्रथमस्थितौ आ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यांतानिसमयोनआवलिमात्रकालेनविनश्यंतिइतःपरमश्वकर्णक्रियासद्भावेरताऽपूर्वस्पर्द्धककरणप्रारंभः॥ योमो
हमहीपालस्यत्रिवेदमहाभटाश्चणोकषायांगरक्षकांश्चनिर्मूलमुन्मूल्यपुंवेदसंवेदा निवृत्तिकरणचरमसमया
नंतरसमयेऽपगतवेदोऽत्रासंज्वलनक्रोधस्वरूपयन्नश्वकर्णकरणरूपक्रियाविशेषंप्रारभते॥ तत्रतावच्चतुःसंज्व
लनानांघातिनांवशेषस्थितिसत्त्वंजघन्यस्पर्द्धकात्प्रभृतिकोत्कृष्टस्पर्द्धकपर्यंतस्पर्द्धकेऽप्रणणुनागसत्त्वंवस्थापयेतत्
त्रस्थितिऽनुभागकांडकघातःप्रवृत्तिविषयोज्ञातव्यः॥ तदनंतरमश्वकर्णकरणस्वरूपनिरूपणंक्रियते तत्रपर्यायश
ब्दनिर्देशमुखेनाश्वकर्णकरणलक्षणमुच्यते [illegible] अश्वकर्णकरणं आंदोलकरणं अपवर्तनोद्वर्तनकरणं चेत्यश्वक
र्णकरणस्यनामत्रयमस्ति [illegible] त्विवेत् अश्वकर्णोयथामध्य [illegible] मेण
आदिपर्यं [illegible] तयातिष्ठति [illegible] नुभागकांडकघा [illegible] रमश्वस्तनानुलक्षणक्रोधसंज्वलनमादिंकृत्वाल्पसं
ज्वलनप [illegible] णानंतगुण [illegible] स्पर्द्धकाकारेणतिष्ठतीति [illegible] श्वकर्णकरणमितिव्यपदिश्यतेआंदोलकरणमितिना
मकथमि [illegible] आंदोलस्तंभ [illegible] क्रमध्यंयथाप्रथमतोंतपर्यंतक्रमेणहीनरूप [illegible] तथात्रापिक्रोधमादिंकृत्वा
लोभपर्यं [illegible] नुभागःक्रमेणहीयमानतयातिष्ठतिअतःकारणादश्वकर्णकरणस्याप्यांदोलकरणमितिनामजातं १९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

यमेकैकफालिं रूपयन् आवलिमात्रकालेनैकं नवकबंधसमयप्रबद्धं रूपयति। अनयावापगतवेदप्रथमस्थितौ
बंधावलिः रूपणावलिः उच्छिष्टावलिश्चेत्यावलित्रये अवशिष्टे बंधावलिप्रथमसमये बद्धसमयप्रबद्धो बंधावलिमती-
त्य प्रतिसमयमेकैकफालिं रूपयन् विनश्यन् रूपणावलिचरमसमये निःशेषं नश्यति। बंधावलिद्वितीयसमये बद्ध-
समयप्रबद्धः रूपणावलिचरमसमये फालिद्वयमवशिष्यन् नश्यति। अनेन क्रमेण गत्वा बंधावलिचरमसमये बद्धसमय-
प्रबद्धः समयोनावलिमात्रफालीरवशिष्यन् नश्यति। रूपणावल्यां बद्धसमयप्रबद्धेष्वेकापि फालिर्न नश्यति। उच्छिष्टावल्यां २
बंध एव नास्ति एवं बंधावलिचरमसमये फालिद्वयमवशिष्यन् नश्यति। अनेन क्रमेण गत्वा बंधावलिचरमसमये बद्धस-
मयप्रबद्धः समयोनावलिमात्रफालीरवशिष्यन् नश्यति। रूपणावल्यां बद्धसमयप्रबद्धेष्वेकापि फालिर्न नश्यति। उच्छि-
ष्टावल्यां बंध एव नास्ति एवं बंधावलिप्रथमसमये बद्धसमयप्रबद्धस्य विनाशात्। एकदेशविकृतमनन्यवदिति न्याये-
न समयोनबंधावलिमात्रसमयप्रबद्धाः संपूर्णरूपणावलिमात्रसमयप्रबद्धाः संपूर्णरूपणावलिमात्रसमयप्रबद्धाश्च
रूपणावलिचरमसमये वर्तिष्यंते। तेन समयोनद्व्यावलिमात्रनवकबंधसमयप्रबद्धाः द्वितीयस्थितौ अवशिष्टाः इति सु-
क्तं अपगतवेदो भूत्वा उच्छिष्टावलिप्रथमसमयात् आरभ्य प्रतिसमयमेकैकसमयप्रबद्धं संज्वलनक्रोधे निक्षिप्य रूपणा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

क्षपणासार २०

कानिसंख्यातानंतेनभक्ताऽनंतस्पर्द्धकमात्रं विशेषं साधयेत्॥ अपगतवेदनयदनुभागकांडकं लांछितं जातं तत्र
स्पर्द्धकाललाविसर्वानुभागसत्वं अनेनाल्पबहुत्वक्रमेणातिष्ठती स्पर्धः॥ अस्याल्पबहुत्वस्यांतदीपकत्वादितः प्राक्तन
गुणस्थानेष्वपिसंज्वलनानामनुभागसत्वमनेनाल्पबहुत्वक्रमेण तिष्ठतीतिज्ञातव्यं क्रोधादिक्रमेणानंतगुणः संज्वलन
सत्वस्पर्द्धकांकसंदृष्टिः॥ ५५५।५१४।५१८।५२२॥ अर्थसंदृष्टिः ए नाँख ए नाँख एनाँख तात्कालिकबंधानुभागस्या
ल्पबहुत्वंकथमस्तीतिचेत्॥ अथ कर्षकिरणप्रथमसमयेऽनु ख भाग ख बंधे ख पिसंज्वलनचतुष्कसत्वानुभागाल्पब
हुत्वक्रमेणतिष्ठति अथ कर्षकिरणप्रथमसमये कांडकलांछितानुभागक्रमः कथमस्तीतिचेत्तत्समये यदनुभागकां
डकंलांछितंजातंतदनुभागकांडकरूपेणगृहीतस्पर्द्धकाल्पबहुत्वमिदं क्रोधकांडकेस्पर्द्धकानिस्तोकानि मानकांड
केविशेषाधिकानि मायाकांडकेविशेषाधिकानि लोभकांडकेविशेषाधिकानि॥ इतः प्राक्तनकांडकेषुमानस्पर्द्धकानि
स्तोकानि पूर्वं क्रोधमायालोभेषुयथाक्रमेण स्वस्वसत्वानुसारेणानुसारेणानुभागकांडकाल्पबहुत्वं प्रवर्तते॥ इदानीम
कर्षकिरणप्रथमसमये परिणाममाहात्म्येन विशेषघातं प्राप्य क्रोधकांडकेषु स्वस्वसत्वानंतबहुभागमात्रस्पर्द्धकानिस्तो २
कानिमानमायालोभकांडकानिक्रमेणविशेषाधिकानिनिर्वर्तीतितात्पर्यं॥ क्रोधादिकांडकानामंकसंदृष्टिः॥ २८७॥ २०

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवर्त्तनोद्वर्त्तनकरणमितिनामकथं क्रोधादिलोभपर्यंतमनंतगुणहानिस्वरूपेणलोभादिक्रोधपर्यंतमनंतगुणवृद्धिस्वरू
पेणानुभागस्तिष्ठति अश्वकर्णकरणस्य ऽपवर्त्तनोद्वर्त्तनकरणमितिनामसंजातं। एवंविधमश्वकर्णकरणं कस्मिन् वसरे प्रा
रभते हास्यादिषट्कं पुंवेदं चिरंतनसत्त्वेन सह संज्वलनक्रोधे सर्वसंक्रमणेन निक्षिप्य तदनंतरक्षणे प्रथमसमये ऽपगतवे
दो भवति तस्मिन् समये प्रथमसमयाश्वकर्णकरणकारको भवति। कृतः क्रोधादिसंज्वलनानां कांडकाधस्तनानुभागस्य।
अश्वकर्णकारेण तदादर्शनात् तदा संज्वलनक्रोधादीनां स्थितिसत्त्वस्थितिबंधौ क्रियेते। तस्मिन् स्थितिसत्त्वं तदा संज्वलनानां
संख्यातवर्षसहस्रप्रमाणं स्थितिबंधो ऽन्तर्मुहूर्त्तोनषोडशवर्षमात्रः घातित्रयस्य स्थितिबं[illegible]स्थितिसत्त्वं वसंख्यातवर्षसह
स्रप्रमाणे[illegible]दनीयानां स्थितिबंधः संख्यातवर्ष[illegible]सत्त्वमसंख्यात[illegible]त्रं। एवमश्वकर्णकरणका
रकस्य प्रथमसमये संज्वलनानां स्थि[illegible]तसत्त्वप्रमा[illegible]तं इदानीं तेषां तस्मि[illegible]नुभागसत्त्वाल्पबहुत्वमुच्य
ते अपगतवेदो भूत्वा यावत्पर्यंतं[illegible]लनानां प्रथम[illegible]गकांडकं घातयतीति[illegible]र्यंतमिदमल्पबहुत्वं[illegible]इ
तिप्रायः। तद्यथा मानेएकगुणहा[illegible]तनानागुणहा[illegible]स्पर्द्धकगर्भमनुभागसत्त्वमनंतमपि[illegible]स्पर्द्धकं
ततः क्रोधसंज्वलने विशेषाधिकं त[illegible]यां विशेषाधिकं ततो लोभे ऽनंतभागरूपेण विशेषाधिकं अत्र स्वस्वसत्त्वस्पर्द्ध

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समानः पुनरपि मानकांडकप्रमाणेनप्रागवस्थाप्तिद्विकाधिकप्रमाणेनवयाकांडकेगृहीतिमानकांडकान्मायाकांडकं
विशेषाधिकं तस्यप्रमाणमिदं ४८६ अधस्तनसवानुभागोदययोरपिसमानः तस्यसंदृष्टिः ५१४ पुनरस्मिन्मायासवानुभाग
ऽनंतभागीकृतेएकभागंतस्मिन्नेवशेषबहुभागेषुप्रक्षिप्तमायाकांडकेनसहयुतेषुमान ४।४।४ कांडकान्मायाकांडकं वि
शेषाधिकं तस्यसंदृष्टिरियं ५१० मायाशेषैकभागोयं ५१३ एतस्मान्मानशेषसवानुभागोऽनंतगुणः तस्यसंदृष्टिः ५१३
अनेनैवप्रकारेणलोभस्यापिविचारणीयालोभस्य ४।४।३।४ नुभागप्रमाणमिदं ५११ अधिकप्रमाणमिदं ७ अस्यकांड ४।४।४
कप्रमाणमिदं ५१७ लोभशेषैकभागप्रमाणमिदं ५१२ अस्मान्मायाशेषानुभागोऽनंतगुणः ततः कारणाद्अश्वकर्णकरण
प्रथमकरणे [illegible] स्पर्द्धकानिलोभादिको ४।४।४ [illegible] गुणान्येवभवंति [illegible] कानितेषांसंदृष्टिः श
८।३।१२८ अनु [illegible] वविषयेयंप्रक्रिया प्रथमसमया [illegible] करणकारकस्योक्रेः [illegible] वंकोधादिक्रमेणाश्व
कर्णकरणस्वनासंदृष्टिः तस्मिन्नश्व [illegible] करणकारकप्र [illegible] ऽपूर्वस्पर्द्ध ३८७ ५२० ५२७
कानिकरोतिपूर्वसंसारावस्थायांअल [illegible] पाणिरूपकं [illegible] श्वकर्णक १२७
रणावस्थायामुपलब्धस्वरूपाणिपूर्व [illegible] कादनंतगुणहीनशक्तिकानियानिअपूर्वस्पर्द्धकानीत्यमताश्वकर्णक० २१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

४८०।५१०।५२१०। कांडकं गृहीत्वा विशेषानुभागोल्पबहुत्वक्रमः कथमिति चेत् लोभं गृहीत्वा विशेषस्पर्द्धकानि लोभका
नि मायायामनंतगुणानि मानेऽनंतगुणानि क्रोधेऽनंतगुणानि भवंति विशेषाधिकप्रमाणानुभागकांडकं गृहीत्वा कां
डकावशिष्टानुभागस्य विशेषाधिकत्वं भवेत् अनंतगुणत्वं कथमिति चेत् परिहारः मानसर्वानुभागात्क्रोधसर्वानुभागो
विशेषाधिकः तस्यांकसंदृष्टिः ५१५। मानसर्वानुभागस्योपरि अधिकस्य क्रोधानुभागस्य संदृष्टिः ३। अपनीतशेषद्रव्यस्या
पि समानं तस्य संदृष्टिः ५१२ इदमनंतेन नक्काबहुभागप्रमाणं कांडकं द्रव्याद्रव्यस्यापि गृहीते कांडके समानेऽवशिष्टानु
कुखंडानिसमानतयाद्विभागीकृत्यापनीतेकरखंडेप्रथमभागेदत्तेकषायद्रव्येणक्रियमाण
कृष्ट्यायामःसाधिकद्विभागोभवतिकिंचिन्मूनद्विभागमात्रोद्वितीयभागोनोकषायप्रतिबद्ध
द्रव्येणक्रियमाणकृष्टिप्रमाणंभवतितयोःसंदृष्टिः $\frac{ख}{ख २}$ $\frac{ख}{ख २}$ अत्रकषायप्रतिबद्धकृष्टीराष्टेल्पसंख्यातेकभागेनभक्त्वा
एकभागमपनीयशेषबहुभागान्चतुर्भिर्भक्त्वाचतुर्ष्वस्थानेषुस्थापयेतअपनीतेकभागमावल्पसंख्यातेकभागे

कृष्टिप्रदेशसमूहस्तावत् अत्रानंतरानंतरेण हस्पऽनंतभागहानिर्भवति। एवमव्यवधानेन दीयमानप्रदेशश्रेणि
रूपणं निरूपितं। व्यवधानेन हश्यमानेनोत्र प्रथमसंग्रहस्य जघन्यकृष्टिप्रदेशसमूहात् तृतीयसंग्रहस्य वरमकृ
ष्टिप्रदेशसमूहो रूपोनसर्वकृष्ट्यायाममात्रविशेषहीनः तस्य संदृष्टिः

व१२।१६४
उ४१९४रव

अत्र अनंतभागहानिरेव न वसं
ख्यातासंख्यातभागहानिः कुतः वर्गणायां दत्तं ततः क्रोधतृतीयसंग्रह वगनया हश्यमाने सकलकृष्ट्या
यामस्यैकस्पर्धकवर्गणाऽनंतैकभागत्वात् प्रथमसमयकृतघातद्रव्यसंग्रहकृष्टिरचनासंदृष्टिः। ततः प्राक्तृयमि
ष्टिमपूर्वापूर्वस्पर्धकप्रतिवद्धद्रव्यं द्व्यर्धगुणहान्याप्तस्का ऽपूर्वस्पर्धकादिवर्गणायां दत्तं ततः क्रोधतृतीयसंग्रहवर ओ
मकृष्टेर्दत्तद्रव्यादनंतगुणहीनं भवति। कुतः क्रोधवरमकृष्टावनंता पूर्वस्पर्धकादिवर्गणानां अपूर्वस्पर्धकप्रति मा
वद्धद्रव्यं द्व्यर्धगुणहान्याप्तस्का ऽपूर्वस्पर्धकादिवर्गणायां दत्तं ततः क्रोधतृतीयसंग्रहवरमकृष्टेर्दत्तद्रव्यादनंतगु
णहीनं कादिवर्गणायां अ आदिवर्गणायाऽसंख्यातैकभागमात्रस्य निक्षेपात् द्वितीयादिवर्गणासु अव्यवधानेन वि या
ऽशेषहीनं द्रव्यं निक्षिपति यावत्पूर्वस्पर्धकचरमवर्गणा तावत्। अत्र कृष्टिस्पर्धकयोर्विशेषलक्षणं किमिति चेत्
स्थानं भवति अनंतगुणाः कृष्टयः स्पर्धकानि स्थानं भवति विशेषाधिकानि एवं कृष्टिकारकस्य प्रथमसमयनिरूप लो

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णं समाप्तं॥ ॥संप्रति द्वितीयसमये क्रियमाणव्यापारकः इति चेत्। द्वितीयसमये पुनः काश्चिदपूर्वकृष्टीः करोति तासां
प्रमाणं किमिति चेत् प्रथमसमयनिर्वर्तितकृष्टीनामसंख्यातैकभागमात्रं भवति। ताः कस्मिन् स्थले करोतीति चेत् प्र
त्येकस्याः संग्रहकृष्टेरधः करोति प्रथमसमयकृतबादरसंग्रहकृष्टीनां जघन्यकृष्टेरधोऽनंतगुणहीनशक्तीर्द्विती
यसमये करोतीति तात्पर्यं तस्य संदृष्टिः। आसामधस्तनकृष्टिरिति नाम। अधुना द्वितीयसमय
कृष्टिषु दीयमानप्रदेशाससमूहस्य श्रेणिनिरूपणं क्रियते। तद्यथा। क्रोधमानमायालोभानां पूर्वा
पूर्वस्पर्धकेभ्यः प्रथमसमयापकृष्टद्रव्यादसंख्यातगुणं द्रव्यमपकर्षति तस्य संदृष्टिः संदृष्टि

४= ख २ ४ ३ व	४= ख २ ४ ३ व	४ ख २ ४ ३ व	४= ख २ ४ ३ व
४- ख २ ४ ३ व	४= ख २ ४ ३ व	४ ख २ ४ ३ व	४= ख २ ४ ३ व
४ ख २ ४ ३ व	४ ख २ ४ ३ व	४ ख २ ४ ३ व	४ ख २ ४ ३ व

धृतानि द्रव्यकद्रव्यकपल्यासंख्यातेन भ

व १२ ३ ८ व	व १२ ३ ८ व	व १२ ३ ८ व	व १२ ३ ८ व	व ३ ७ १२/२४	व ३ ७ १२/२४	व ३ ७ १२/२४	व ३ ७ १२-४/२४
लो	या	मा	क्रो	व ३ ७ १२/२४	व ३ ७ १२/२४	व ३ ७ १२/२४	व ३ ७ १२/२४
[illegible]	[illegible]	[illegible]	[illegible]	व ३ ७ १२/२४	व ३ ७ १२/२४	व ३ ७ १२/२४	व ३ ७ १२/२४

स्का। एकभा
गं पूर्वापूर्वस्पर्धकेषु निक्षेपार्थं द्रव्य कासंख्यातप्रदेशा षवकृतभागेषु गुणकार
भागहारभूतपल्यासंख्यातावपवर्त्यशेषद्रव्याणि कृष्टिका रकस्य प्रथमसमयोक्तक्रमेण बादरसं
ग्रहकृष्टीनां ज्ञातव्यानि द्रष्टव्ये सति लोभमायामानक्रोधक्रमेण संदृष्टिः। अत्र कृष्टिकारकस्य प्रथमसमयविशेषमाहात्म्यं कवा
लोभस्वरूपेण प्रथमसंग्रहपूर्वकृष्ट्यायामं गच्छं कृत्वा रूपेणोनो गच्छो दलीकृतः प्रचयताडितो मिश्रः प्रचयवेन पदास्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

संकलितं भवति सर्वेषामिति सूत्रेण धनमानीयतेऽत्र संकलनप्रथमसंग्रहकृष्टिप्रतिबद्धद्वितीयसमयद्रव्याद
पनीयपृथक्संस्थापयेत्। प्रथमसमयविशेषसंदृष्टिः व १२ | ३४२६४ | ख — ख इदं वि इति संलिख्य ऊनलोत्रस्य प्रथमसंग्रहकृष्ट्या
यामनमात्रविशेषान् आदिं कृत्वा एकविशेषमुत्तरं कृत्वा द्वितीयसंग्रहकृष्ट्यायामं गच्छं कृत्वा पूर्वोक्तसूत्रेण धन
मानीयतेऽत्र द्वितीयसंग्रहकृष्टिप्रतिबद्धद्रव्यादपनीयपृथक्संस्थापयेत् ऊनलोत्र प्रथमद्वितीयसंग्रहकृष्टिप्रति
बद्धद्रव्यादपनीयपृथक्संस्थापयेत् ऊनलोत्र प्रथमद्वितीयसंग्रहकृष्ट्यायामनमात्रविशेषान् आदिं एकविशेषमुत्तरं लो
त्रतृतीयसंग्रहकृष्ट्यायामं गच्छं च कृत्वा धनमानीयतेऽत्र तृतीयसंग्रहकृष्टिप्रतिबद्धद्रव्यादपनीयपृथक्संस्थापयेत् ऊ
नरधस्तनसंग्रहत्रयमात्रविशेषान् आदिं एकविशेषं चोत्तरं मायाप्रथमसंग्रहकृष्ट्यायामं गच्छं कृत्वा धनमानीयमाया १
संज्वलनप्रथमसंग्रहकृष्टिप्रतिबद्धद्वितीयसमयद्रव्याद्गृहीत्वा पृथक्संस्थापयेत् एवं शेषाष्टसंग्रहकृष्टिष्वपि स्व
स्वाधस्तनसर्वसंग्रहकृष्टिमात्रविशेषान् आदिं प्रथमसमये एकविशेषं चोत्तरं स्वस्वसंग्रहकृष्ट्यायामं गच्छं विधाय ध
नमानीय स्वस्वसंग्रहकृष्टिप्रतिबद्धद्वितीयसमयद्रव्याद्गृहीत्वा पृथक्संस्थापयेत् अपनीतद्रव्यसंदृष्टिः एषामधस्त ५२
नशीर्षद्रव्यमिति संज्ञा एतद्द्रव्यं सर्वमपि मिलितं सत् एकविशेषाधिकोत्तररूपोनसकलकृष्ट्यायामगच्छसंकलनमा

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नागमपनीयवक्रभागेभ्यस्स्वद्वितीयखंडेदत्तेभ्यस्स्वद्वितीयसंग्रहकृष्ट्यायामः किंचिन्न्यूनोभवति। अपनीतैकैकभागे
सस्वतृतीयखंडेदत्तेस्वस्वतृतीयसंग्रहकृष्ट्यायामः किंचिन्न्यूनोभवति भागमपनीतनोकषायप्रतिबद्धकृष्टीनाक्रोधतृतीय
त्रिभागे। नोधाद्‌स्यात्तिः समन्दीकृत्यनिक्षिप्तासु क्रोधतृतीयसंग्रहकृष्ट्यायामः सर्वकृष्ट्यायामात्त्रयोदशगुणोभव
ति। एवंतेषांद्वादशानांसंग्रहकृष्ट्यायामानांलोभमायामानक्रोधक्रमेणसंदृष्टिः अत्रपदासमखि
लंधनंभवति। मध्यमैकोनितद्विकपदवर्जितद्विगुणहानिकं चतत्स्वयाद्विगुणहानिसंगुणित
एआदिप्रमाअनंतभागहानिखेन च२०३ विशेषपरिहाणितागमनिकाप्रतीवर्त्तति इत्येतत्सूत्रे।
ध्यासर्वकृष्टिसंयोगेनोपकृष्टसर्वद्रव्येनकेमध्यमकृष्टौदेयद्रव्यप्रमाणमायातितद्रूपोनसर्व

४= ख २४	४= ख२४	४= ख२४	४=२ ख २४
४- ख २४	४- ख२४	४- ख२४	४ ख२४
४ ख ४	४ ख२४	४ ख२४	४ ख२४

कृष्ट्यायामार्धेनंकचद्विगुणगुणहान्यालकंसत्एकविशेषप्रमाणंभवतिसंदृष्टिः | व २१ ४।१२६४ ख ख२ | द्विगुणगुणहान्यागुणितस्मन्
यावान्लब्धतेतावन्मात्रप्रदेशसमूहंलोभस्यप्रथमसंग्रहस्यजघन्यकृष्टौददा तितथायतनकृष्टिद्रव्येप्याम
संदृष्टिः | व २१।२६ ३४।१२६४ ख ख२ | द्वितीयकृष्टौविशेषहीनंददातिसंदृष्टि | व।२।२६-२ ३४।१२६।-४१ ख ख२ | एवमग्रवधानेनतृतीयादिकृष्टिष्वेकैकवि
षहीनंद स्पर्धकनिक्षिपतियावत्सर्वसंग्रहकृष्टीनां मंतरकृष्टीरतीत्यक्रोधतृतीयसंग्रहस्यचरम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

क्षपणासार॰
५३

तृतीयसंग्रहप्रतिबद्धद्वितीयसमयद्रव्यात्गृहीत्वा पृथक्संस्थापयेत् । पुनः रूपाधिकक्रोधतृतीयसंग्रहपूर्वापूर्वकृष्टिमात्रवि
शेषान् आदिं कृत्वा एकविशेषमुत्तरं कृत्वा क्रोधद्वितीयसंग्रहपूर्वापूर्वकृष्टीर्गच्छं कृत्वा धनमानीय क्रोधद्वितीयसंग्रहकृष्टिप्र
तिबद्धद्वितीयसमयद्रव्यादपनीय पृथगस्थापयेत् । पुना रूपाधिकक्रोधतृतीयद्वितीयसंग्रहकृष्टिमात्रविशेषान् आदिं कृत्वा ए
कविशेषमुत्तरं कृत्वा क्रोधप्रथमसंग्रहपूर्वापूर्वसंग्रहकृष्टीर्गच्छं कृत्वा धनमानीय क्रोधप्रथमसंग्रहप्रतिबद्धद्वितीयस
मयद्रव्यात् स्वीकृत्य पृथग्निक्षिपेत् । पुनः रूपाधिकक्रोधसंज्वलनपूर्वापूर्वसंग्रहकृष्टित्रयमात्रविशेषान् आदिं कृत्वा एकवि
शेषमुत्तरं कृत्वा मानसंज्वलनतृतीयकृष्टेर्नूतनोपरातनकृष्ट्यायामं गच्छं कृत्वा धनमानीय मानसंज्वलनतृतीयसंग्रहकृष्टि
प्रतिबद्धद्वितीयसमयद्रव्यादपनीय पृथक्संस्थापयेत् । एवं मानसंज्वलनद्वितीयसंग्रहकृष्ट्यादिं कृत्वा शेषाः संग्रहकृ
ष्टीनामपि स्वस्वाधस्तनरूपाधिकसकलसंग्रहकृष्टिमात्रविशेषान् आदिं कृत्वा एकविशेषमुत्तरं कृत्वा स्वस्वसंग्रहकृष्ट्या
यामं गच्छं कृत्वा धनमानीय स्वस्वसंग्रहप्रतिबद्धद्वितीयसमयद्रव्यादपनीय पृथक्संस्थापयेत् । अपनीतद्रव्याणां लोभमाया
मानक्रोधक्रमेण संदृष्टिः । एषामुभयद्रव्यविशेष इति संज्ञा । एते सर्वेपि मिलिताः संतः एकोनयद्रव्यविशेषमात्रं नूतनोप ५३
रातनसकलकृष्ट्यायामगच्छसंकलनमात्रा भवंति संदृष्टिः विधध / खखर एतदुक्तविविधद्रव्यहीनस्वमात्रविशेषांश्च स्वीकृत्य

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व १२। ध उ ध ख२ध उँ७ ख	व १२।ध उ ४ ख२४ उँ७ ख	व १२।धं उ४ ख२४ उँ७ ख	व १२।४ उ ध ख२ध उँ७ ख	व १२।धं ५ ख२४उख२४।२	धं विध ११ ख२४ ख२४। २	धं विध १७ ख२४ ख२४ २	धं विध धप।५ ख२४ ख२४। २
व १२। ध उध ख२ध उ७ ख	व १२।४ उ ४ ख२४ उँ७ ख	व १२।४ उँध ख२ध उँ७ ख	व १२।४ उ ध ख२५ उँ७ ख	व धं।धं ३ ख२४ ख२४ २ २४	धं विध ९ ख२४ ख२५। २	धं विध १५ ख२४ ख२४ २	धं विध २१ ख२ ख२४। २
व १२।४ उ४ख२४ उ७ ख	व १२।४ उ ४ ख२४ उँ७ ख	व १२।ध उँध ख२४ उ७ ख	व १२।४ उँ४ख२४ उँ७ ख	वि धं ख२४।ख२४।२	धं विध ७ ख२४ ख२४। २	धं विध १३ ख२४ ख२४। २	धं विध १९ ख२४ ख२४। २

केनवति [विधां धं / ख ख२] ऊनद्वोनप्रथमसंग्रहस्पर्धकघनकृष्टिप्रथमसमयदत्तद्रव्यंसंख्यापप्रागुक्तस्वस्वाधस्तनकृष्टिलिः संगुण
खखसंग्र इकृष्टिप्रतिवद्धि द्वितीयसमयद्रव्यादपनीयपृथक्संस्थापयेतञ्ज्ञपनीनद्रव्यस्यसंदृष्टिः। अस्याधस्तन
कृष्टिद्रव्यमितिनामाअस्यसर्वस्यापि मिलितस्यसंदृष्टिः [व१२।धं२४ / उ ध ख२४ उँ७] ऊनःप्रथमसमयाद्वितीयसमयकृष्टिप्रतिवद्धसर्व
द्रव्यंसंयोज्यप्रथमसमयकृष्ट्यायामादसंख्यातैकभागाधि [ख] कद्वितीयसमयनूतनपुरातनकृष्ट्यायामेनक्तास
पानूतनपुरातनकृष्ट्यायामार्द्धहीनद्विगुणहान्याचक्तेऽनयद्रव्यविशेषसमायातितस्यसंदृष्टि [व१२ँ / उ४१२ँ] इमं वि
इतिकृत्वाआदिंगत्तस्वविषयकोधसंकलनतृतीयसंग्रहपूर्वापूर्वकृष्टीर्गच्छिंकृत्वाधनमानीयकोधसं [ख ख] कलन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संग्रहकृष्टिप्रतिवर्द्धनि द्वितीयसमयस्याधस्तनकृष्ट्यधस्तनशीर्षमध्यमखंडोनयद्व्यविशेषनामानिवचादि
द्रव्याणिक्रमेणसंस्थाप्यतेअधस्तनशीर्षद्रव्यंविनाऽधस्तनकृष्टिद्रव्येष्वेककृष्टिद्रव्यंमध्यमखंडद्रव्यादेक
खंडमुत्तयद्व्यविशेषेस्योऽतीतकृष्ट्यायामद्दानद्वितीयसमयासर्वकृष्ट्यायाममात्रविशेषांश्चस्वीकृत्यद्विती
यसंग्रहकृष्टेरधःनिर्वर्त्यमानापूर्वकृष्टिप्रथमकृष्टिस्वरूपेणनिक्षिपतीतितासर्थश्रेण्याऽसंख्यातभागाधिक।
चेयुक्तिःप्राग्वद्वक्तव्याकिंतुप्रथमसंग्रहकृष्टेर्याचरमकृष्टिस्तस्यांदृश्यमानतयास्थितप्रदेशसमूहादिदानीं
दीयमानप्रदेशपिंडोऽसंख्यातगुणोभवतिततःकारणादेकोनयद्व्यविशेषहीनतचरमेदृश्यमानप्रदेशमात्राधि
कतयाऽपूर्वकृष्टीनांप्रथमकृष्टौप्रदेशपिंडपततिअनेनप्रकारेणद्रव्यनिक्षेपाकरणपक्षेकृष्टिषुएकगोपुच्छस्याऽभा
वोजायतेततःपरंअनंतभागहीनंनिक्षिपतियावदपूर्वकृष्टीनांचरमकृष्टिस्तावत्पूर्वोक्तक्रमेणाधस्तनकृष्टि
द्रव्यादेककृष्टिद्रव्यंमध्यमखंडेस्यएकखंडंऊनयद्व्यविशेषेस्यातीतनूतनउपरातनकृष्ट्यायामहीमद्वितीयसमय
सर्वकृष्ट्यायाममात्रविशेषांश्चस्वीकृत्यलोकद्वितीयसंग्रहकृष्टेरधोनिर्वर्त्यमानापूर्वकृष्टीनांद्वितीयकृष्टिप्रादिंस ५५
वाचरमकृष्टिपर्यंतंनिक्षिपत्यातीत्सर्थश्चसर्वापूर्वकृष्टिष्वनंतभागहीनंकृतःएकोनयद्व्यविशेषमात्रेणहीयते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

थमसमयकृतद्वितीयकृष्टिरूपेण निक्षिपतीत्यर्थः तदनंतराधस्तनकृष्टिद्रव्यप्रदेशसमूहादयं द्वितीयकृष्टिद्रव्यप्रदेशसमूहः
कियताहीन इति चित्तेत्प्रथमसमयविशेषोनोत्पन्नद्रव्यविशेषमात्रेणहीयते तस्य तृतीयकृष्ट्यावधस्तनशीर्षद्रव्यस्यपंचैवि
शेषो मध्यमखंडेस्य एकखंडं उभयद्रव्यविशेषेष्वेतातकृष्ट्यायामहीनसर्वकृष्ट्यायाममात्रविशेषांश्च स्वीकृत्य निक्षेप
तिचतुर्थकृष्टावधस्तनशीर्षद्रव्यादिविशेषत्रयं मध्यमखंडेस्य एकखंडमुभयद्रव्यविशेषमेतातकृष्ट्यायामहीनसकल

विध ४ ५३ ख२४ ख२४।२	विध ४ ३७ ख२४ ख२४।२	विध ४ ३१ ख२४ ख२४।२	विध ४ ६९ ख२४ ख२४।२
विध ४ ४५ ख२४ ख२४।२	विध ४ ३९ ख२४ ख२४।२	विध ४ ३३ ख२४ ख२४।२	विध ४ २७ ख२४ ख२४।२
विध ४ ५७ ख२४ ख२४।२	विध ४ ६१ ख२४ ख२४।२	विध ४ ३५ ख२४ ख२४।२	विध ४ २९ ख२४ ख२४।२

कृष्ट्यायाममात्रविशेषांश्च स्वीकृत्य लोभप्रथमसंग्रहकृष्टेः पंचमकृष्टेः प्रतति
श्रमवधानेनानंतभागहीनं निक्षिपन्गच्छति। यावत् लोभप्रथमसंग्रहकृ
ष्टेश्चरमकृष्टिस्तावत् अत्रानंतराधस्तनकृष्टिद्रव्यप्रदेशसमूहात्त्वरमकृ
ष्टिद्रव्यप्रदेशसमूहः प्रथमसमयविशेषोनोत्पन्नद्रव्यविशेषमात्रेणहीनो
भवतीति ज्ञातव्यं अत्र लोभसंज्वलनप्रथमसंग्रहकृष्टिप्रतिबद्धद्वितीय
समयवर्त्तःप्रकारद्व्याणिसमाप्तानि॥ प्रथमसंग्रहकृष्टेश्चरमकृष्टिद्रव्यप्रदेशसमूहात्प्रथमसमयकृतलोभद्वितीय
संग्रहकृष्टेरधोनिर्वर्त्यमानाधस्तनकृष्टिजघन्यकृष्टिद्रव्यप्रदेशसमूहोऽसंख्यातभागाधिको भवति लोभसंज्वलनद्वितीय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वितीयसंग्रहकृष्टयः क्रमेण द्रव्यं निक्षेपणीयमित्यर्थः। किंतु अधस्तनशीर्षद्रव्यविशेषेभ्यस्तत्तद्द्रव्यविशेषस्य
प्रकृष्ट्यायामप्रमाणं ज्ञात्वा गृहीतव्यं। अत्र तृतीयसंग्रहकृष्टिषु तिष्ठद्द्वितीयसमयस्पर्धकविधिद्रव्यं समाप्तं॥ त
तः परं लोभतृतीयसंग्रहकृष्टिचरमकृष्टितो द्वितीयसमयनिर्वर्त्यमानामायायां या जघन्यकृष्टिस्तस्यां प्रदेशासमू
हमसंख्यातभागाधिकं निक्षिपति। मायासंज्वलनप्रथमसंग्रहकृष्टेषु तिष्ठद्द्रव्यविधिद्रव्याणि क्रमेण संख्याप्याधस्त
नशीर्षद्रव्यं स्पर्धकाधस्तनकृष्टिद्रव्यं मध्यमखंडद्रव्यादिकखंडमुत्तयद्रव्यविशेषेभ्यो ऽतीतनूतनपुरातनकृष्ट्यायाम
मनूनद्वितीयसमयसर्वकृष्ट्यायाममात्रविशेषांश्च गृहीत्वा मायासंज्वलनप्रथमसंग्रहकृष्टेरधो निर्वर्त्यमानाः पूर्व
कृष्टीनां जघन्यकृष्टेर्निक्षिपतीत्यर्थः। अत्राधिकप्रमाणं कियदिति चेत् उत्तयद्रव्यविशेषहीनलोभतृतीयसंग्र
हकृष्टिचरमपूर्वकृष्टिमात्रं भवति। इतउपरि अनंतभागहीनं यावद् पूर्वचरमकृष्टिस्तावत्। अधस्तनकृष्टिद्रव्या
दिककृष्टिद्रव्यं मध्यमखंडद्रव्यादिकखंडमुत्तयद्रव्यविशेषेभ्यो ऽतीतनूतननपुरातनकृष्ट्यायाममनूनद्वितीयसम
यसर्वकृष्ट्यायाममात्रविशेषांश्च गृहीत्वा द्वितीयापूर्वकृष्टिमादिं कृत्वा इदानीं निर्वर्त्यमाना पूर्वकृष्टिचरमकृष्टिपर्यं
तं निक्षिपन् गच्छतीत्यर्थः। इत उपरि क्रोधतृतीयसंग्रहचरमकृष्टिपर्यंतं पूर्वोक्तक्रमेण दीयमानं व्याप्नितयेत् द्विती ९५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यर्थोग्राह्यः अत्राधस्तनकृष्टिद्रव्यं समाप्तं ॥ ततः प्रथमसमयनिर्वर्त्तितद्वितीयसंग्रहकृष्टिजघन्यकृष्टावसंख्यातभाग
हीनं ददाति अधस्तनशीर्षद्रव्याद तीतसर्वपूर्वकृष्ट्यायाममात्रविशेषान्मध्यमखंडस्य एकखंडमुलयद्रव्यविशेषस्यो
ऽतीतपूर्वापूर्वकृष्ट्यायामहीनद्वितीयसमयसर्वकृष्ट्यायाममात्रविशेषांश्च स्वीकृत्य प्रथमसमयनिर्वर्त्तितकृष्टिज
घन्यकृष्ट्याकारेण ददातीत्यर्थः अत्र हीयमानासंख्यातैकभागस्य प्रमाणं कियदिति चेत् एकोलयद्रव्यविशेषाधि
कद्वितीयसंग्रहजघन्यपूर्वकृष्टिमात्रं भवति इतः परमनंतभागहीनां यावद्द्वितीयसंग्रहकृष्टेश्चरमकृष्टिस्ताव
त् अधस्तनशीर्षद्रव्यादतीतसर्वपूर्वकृष्ट्यायाममात्रविशेषान्मध्यमखंडस्य एकखंडमुलयद्रव्यविशेषस्योऽती
तनूतनपुरातनकृष्ट्यायामन्यूनद्वितीयसमयसर्वकृष्ट्यायाममात्रविशेषांश्च स्वीकृत्य प्रथमसमयकृतकृष्टीनां
द्वितीयकृष्टेरनंतनिक्षिपन्गच्छति द्वितीयसंग्रहकृष्टिचरमकृष्टिपर्यंतमित्यर्थः सर्वपूर्वकृष्टिष्वनंतभागही
नं कथमिति चेत् प्रथमसमयविशेषन्यूनेकोलयद्रव्यविशेषेण हीनं भवतीत्ययमर्थो ग्राह्यः। अत्र लोलद्वितीयसंग्र
हकृष्टिप्रतिबद्धद्वितीयसमयबद्धः प्रकारद्रव्यं समाप्तं ॥ इतउपरि लोलद्वितीयसंग्रहकृष्टौ पूर्वनिषेकनिरूपणं
यथाकृतं तथैव तोऽन्ततीयसंग्रहकृष्टावपि कर्त्तव्यं तृतीयसंग्रहकृष्टिप्रतिबद्धद्रव्यविधद्रव्याणि क्रमेण संख्याप

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गेस्वस्वापूर्वस्पर्द्धकादिवर्गणायांदत्तेस्वस्वचरमकृष्टिदत्तप्रदेशसमूहादनंतगुणहीनंभवतिअपकृष्टमुपरितनवर्ग
णासुअनंतभागहीनस्वरूपेणददातिएवंदीयमानक्रमउक्तः॥ दृश्यमानद्रव्यक्रमःकथमस्तीतिचेत्॥ द्वितीयस
मयेकृष्टिद्रव्यःप्रदेशसमूहोदृश्यमानःसलोभजघन्यकृष्टौवक्तव्यःशेषसर्वकृष्टिष्वनंतभागहीनतयाक्रोधच
रमकृष्टिपर्यंतंतिष्ठति। चरमकृष्टिद्रव्यात्पूर्वस्पर्द्धकादिवर्गणादृश्यमानप्रदेशसमूहोऽनंतगुणहीनः एवमनु
भागमाश्रित्यदृश्यमानक्रमउक्तः कृष्टिकारकस्यद्वितीयसमयप्रतिबद्धपूर्वापूर्वकृष्टिस्वरूपेणतृतीयादिसमयेषु
दीयमानदृश्यमानप्रदेशश्रेणिनिरूपणंकथमस्तीतिचेत्द्वितीयसमयेयथाकृष्टित्रयोविंशतिकूटाकारेण
द्रव्यंददातितथैवसर्वकृष्टिकरणकाले
पिदीयमानप्रदेशसमूहस्यत्रयोविंशति
कूटानिभवंतिद्वितीयसमयेप्रदेशसमूहम



पकृष्यगृहीत्वायादृशसंग्रहकृष्टिस्वरूपेणददातितथैवसर्वकृष्टिकरणकालेपिप्रतिसमयमपकृष्यकृष्टिप्रतिब
द्धद्रव्यंप्राग्वद्गृहीत्वादीयमानप्रदेशसमूहंत्रयोविंशतिकूटाकारेणददातीत्यर्थः। दृश्यमानप्रदेशसमूहस्सर्वकृ ४६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यसमयेऽनेनक्रमेणाङ्कमनिक्षेपेकृतेकतिपयस्थानेष्वसंख्यातभागहीनंकतिपयस्थानेष्वसंख्यातभागाधिकंभवति।
तदेतासंग्रहकृष्टीनांद्वादशप्रथमापूर्वकृष्टिषुअनन्तयद्रव्यविशेषाधिकस्वस्वपूर्वजघन्यकृष्टिमात्रासंख्यातभा
गहीनतयासंग्रहकृष्टीनांमध्येक्रियमाणाऽपूर्वकृष्टीनामेकादशजघन्यकृष्टिषुलयद्रव्यविशेषोनस्वस्वपूर्वचिर
कृष्टिमात्रासंख्यातभागाधिकतयात्रयोविंशस्थानानित्यक्त्वाशेषाऽनंतनूतनपुरातनकृष्टिस्थानकेषुयथाक्रममु
लयद्रव्यविशेषहीनतयाप्रथमसमयविशेषोनालयद्रव्यविशेषेणहीनंद्रव्यंनिक्षिपति।द्वितीयसमयेदीयमानप्र
देशासमूहस्यैयंश्रेणिरुष्ट्रकूटसदृशीभवतियतःकारणात्द्वितीयसमयेऽपकृष्यकृष्टिषुदत्तद्रव्यस्यद्वादशास्वव
स्थानेष्वसंख्यातभागहान्या।एकादशस्ववस्थानेष्वसंख्यातभागवृद्ध्याशेषानंतकृष्टिस्थानकेष्वनंतभागहान्याऽव
स्थाननियमोजातस्ततःकारणाद्दीयमानप्रदेशश्रेणिस्त्रयोविंशतिस्थानेषुउष्ट्र[illegible]मानतयातिष्ठतीत्यर्थः।उष्ट्रस्य
पृष्ठिर्यथा।पश्चिमभागेउन्नततयामध्यमभागेनिम्नतयाऽग्रेनिम्नोन्नतक्रमेणतिष्ठतितथैवात्रापिप्रदेशनिक्षेपः।प्रथ
मसमयदत्तयाऊनद्रव्या।अग्रेकेषुकियत्स्थानेषुहान्यावृद्ध्याचनिक्षिपतीतितात्पर्यं।एवंसतिद्वितीयसमयापकृष्टकृष्टिप्रतिव
द्धसर्वद्रव्यंसंपूर्णंभवति।धनरूपिपाकरणनिक्षिप्तपूर्वापूर्वस्पर्द्धकप्रतिबद्धस्वकीयद्रव्यंसर्वगुणहान्यास्तकाणकत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्वस्पर्द्धकान्येवानुभवति न कृष्टीरनुभवतीत्यर्थः ।। अपूर्वस्पर्द्धकानि कृष्टीश्च न तस्मिन्काले पूर्वस्पर्द्धकैः सहापूर्वस्पर्द्धकान्यनुभव
ति । तथा कृष्टीः कर्मस्तस्मिन्काले कृष्टीर्नानुभवति कृष्टिकरणकाले पूर्वापूर्वस्पर्द्धकान्येवानुभवतीति तात्पर्यं । प्रथमस्थि
तावावलिमात्रावशिष्टायां कृष्टिकरणकालः समाप्तः ।। ।।कृष्टिकरणकालचरमसमये नुभूयमानोदयनिषेकं मुक्त्वा त
त्रोपरि क्रोधसंज्वलनस्योच्छिष्टावलिमात्रप्रथमस्थितावशिष्टायां बादरकृष्टिकरणकालः समाप्तः । इति तात्पर्यं । एवं कृ
ष्टिकरणाधिकारः समाप्तः ।। ।।इतोग्रे कृष्टिवेदनाधिकार आरभ्यते । कृष्टिकारकचरमसमयानंतरसमये कृष्टीनां वेदको भ
वति द्वितीयस्थितौ स्थितकृष्टीरपकृष्यागत्य चाप्रथमस्थितौ दत्वानुभवतीत्यर्थः । कृष्टिकारकचरमसमयानंतरसमये कृ
~~ष्टीनां वेदको भवति द्वितीयस्थितौ स्थितकृष्टीरपकृष्य~~ कृष्टिवेदकस्य प्रथमसमये चतुःसंज्वलनानां स्थितिबंधः
संपूर्णचत्वारिमासमात्रः कृष्टिकारकचरमसमये चतुःसंज्वलनानामंतर्मुहूर्त्ताधिकचत्वारिमासमात्रं बध्नन् इदानीमंतर्मुहू
र्त्तहीनयितव्यान्यस्थितिबंधं संपूर्णचत्वारिमासमात्रं बध्नातीति तात्पर्यं । चतुःसंज्वलनस्थितिसत्त्वं संपूर्णाष्टवर्षप्रमाणं । पूर्वस
मयेंतर्मुहूर्त्ताधिकाष्टवर्षमात्रतया स्थितं चतुःसंज्वलनसत्त्वं तस्मिन्नेव समयेंतर्मुहूर्त्तात्मकं कांडकचरमफालिपत ४७
न इदानीं परिपूर्णाष्टवर्षमात्रं भवतीत्यर्थः । घातित्रयस्य स्थितिबंधः स्थितिसत्त्वं संख्यातवर्षसहस्रमात्रे भवतः नामगोत्रवेद

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्टिषु अनंतगुणहीन एव अनुभवति। एवं प्रतिसमयमपकृष्टद्रव्यस्याल्पबहुत्वमुच्यते। यः प्रदेशसमूहः कृष्टिकारकस्य प्रथमसम
ये अपकृष्य गृहीतः सा कल्पेन कृष्टिषु दीयते स स्तोकः द्वितीयसमये कृष्टिरूपेण दत्तद्रव्यमसंख्यातगुणं तृतीयसमये कृष्टि
रूपेण दत्तद्रव्यमसंख्यातगुणं एवं प्रतिसमयमसंख्यातगुणितद्रव्यमपकृष्य गृहीत्वा कृष्टिषु ददाति यावत्कृष्टिकरण
कालचरमसमयस्तावत्। एवमंतर्मुहूर्त्तकालप्रमाणं कृष्टिकरणकालं क्रमेणातीत्य चरमसमये वर्त्तमानस्य स्थितिबंधा
दिप्रमाणं क्रियदिति चेत्। कृष्टिकरणकालचरमसमये चतुःसंज्वलनस्थितिबंधोंतर्मुहूर्त्ताधिकचतुर्मासमात्रः शेषक
र्मणां स्थितिबंधः संख्यातवर्षसहस्रमात्रः। अपूर्वस्पर्द्धककरणकालचरमसमये ऽष्टवर्षप्रमाणः संज्वलनचतुष्टयस्थि
तिबंधः अंतर्मुहूर्त्तमात्रेण हीयमानः आगत्यांतर्मुहूर्त्ताधिकचतुर्मासमात्रो जातः शेषकर्मणां स्थितिबंधः प्राक्तनसं
ख्यातवर्षसहस्रप्रमाणात्संख्यातगुणहानिरूपेण संख्यातसहस्रस्थितिबंधापसरणैः हीयमानो भूत्वा इदानीमपि संख्या २
तवर्षसहस्रप्रमाणं न जहातीत्यर्थः। अस्मिन् कृष्टिकरणकालचरमसमये मोहनीयस्य स्थितिसत्त्वं प्राक्तनसंख्यातवर्षसह
स्रप्रमाणेन हीनं भूत्वा इदानीमंतर्मुहूर्त्ताधिकाष्टवर्षमात्रं जातं घातित्रयस्य स्थितिसत्त्वं संख्यातवर्षसहस्रमात्रं नामगोत्र
वेदनीयानां स्थितिसत्त्वमसंख्यातवर्षसहस्रप्रमाणं। अत्र सिंहावलोकनन्यायेनातिक्रांतार्थनिरूपणं क्रियते। कृष्टीः कुर्वन्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नो ऽधिकानुभागं वमुक्त्वा शेषं चतुः संज्वलनानुभाग सत्त्वं सर्वमपि कृष्टिरूपेण परिणमितं। अत्र सर्वकृष्टिकरण
काले कृष्टिषु दृश्यमानप्रदेशसमूहः स्वस्थाने एकगोपुच्छरूपेण तिष्ठति। स्पर्द्धकगतप्रदेशोऽपि स्वस्थाने एकगो
पुच्छाकारेण तिष्ठति कृष्टिगतसर्वप्रदेशपिंडात्स्पर्द्धकगतप्रदेशपिंडोऽसंख्यातगुणस्तया। कृष्टिकरणकालः
चरमसमयावत्तावत् एकगोपुच्छाकारेण तिष्ठति। कृष्टिकारकालसमाप्त्यनंतरं सर्वं दृश्यमानप्रदेशसमूहः कृ
ष्टिरूपेण परिणम्य एकगोपुच्छाकारेण तिष्ठति। अत्र कृष्टिरूपेण परिणतद्रव्यप्रमाणं लोभमायामानक्रोधक्र
मेणेदं। | स१२२ | स१२= | स१२= | स१२=५ | एषां द्रव्याणां विभागक्रमः कृष्टिकारकस्य द्वितीयसमयोक्तप्रकारेण भवति
एवं वि | ७।८ | ७।८ | ७।८ | ७।८ १ | नष्टकपादशसंग्रहकृष्टिप्रतिबद्धद्रव्याणि पूर्वापूर्वकृष्टिरूपेण संस्थाप्यत्र यो
विंशत्कषट्कूटस्थाना निःशेषानंतभागहानिस्थानानि च पूर्वोक्तक्रमेण वक्तव्यानि कृष्टिकारकस्य द्वितीयसमया
द्विचरमसमयपर्यंतनिर्वर्तिता। पूर्वकृष्टिप्रमाणं प्रथमसमयकृतकृष्ट्यसंख्यातैकभागमात्रं भवति। ततः कारण १
प्रथमसमयकृतकृष्टिभ्यः सा असंख्यातैकभागनिक्षिप्ते सर्वकृष्टिप्रमाणं भवति | ४ ख | कृष्टिवेदकस्य प्रथमसमये १ ४८
प्रथमसंग्रहकृष्टितः एतावत्प्रदेशसमूहः | स१२।१२ २४।७ | मपकृष्य गृहीत्वा तत्पल्यासंख्यातेन तस्मात् एकखंडमेतावत्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नीयानां स्थितिबंधः संख्यातवर्षसहस्रप्रमाणः। नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्यातवर्षसहस्रमात्रं भवति। नामगोत्रवे
दनीपरिपूर्ण्णा ष्टवर्षमात्रं भवतीत्यर्थः। घातित्रयस्य स्थितिबंधः स्थितिसत्त्वं संख्यातवर्षसहस्रमात्रं भवतः। नामगोत्रवेदनीया
नां स्थितिबंधः संख्यातवर्षसहस्रप्रमाणः। नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्यातवर्षसहस्रमात्रं भवति नामगोत्रवेदनी।
यानामनुभागबंधः कथमस्तीति चेत्। तात्कालिकगुडखंडशर्करामृतरूपेणाप्युत्कृष्टं प्रवर्त्तते तत्प्रमाणमेव भवति अ
नुभवरहितसमयोनोच्छ्यावलिस्थितं क्रोधसंज्वलनस्यानुभागसत्त्वं सर्वघातिशक्तियुक्तं भवति कारणं किमिति चेत्
समयोनोदयावल्यां यतः कारणात् पूर्वस्पर्धकानि संतिष्ठंति तेषु पूर्वस्पर्धकानुभागसत्त्वं लतादारुसमानशक्तियुक्तं तिष्ठति।
ततः कारणात् तदपेक्षया सर्वघातीत्युक्तं समयोनावलिप्रमाणं सर्वघात्यनुभागसत्त्वमुदयकाले कृष्टिरूपेण भूत्वा
उदयनिषेके उदेष्यत्यागच्छति। आवल्यां समयोनत्वं कथं जातमिति चेत्। उच्छिष्टावलिप्रथमनिषेकस्य वर्त्तमानसमये परमु
खोदयसद्भावात् कृष्टिरूपेण परिणमनाभावेन। चतुःसंज्वलनेषु द्वयेऽपि समयोनद्व्यावलिमात्रनवकबंधसमयप्रबद्धाः
तेषामनुभागाः देशघातिशक्तियुक्ता भवंति तत्स्पर्धकशक्तियुक्ताः। कुतः। कृष्टिकारकस्य काले कृष्टिरूपेण बंधाभा
वात्। तेऽपि द्विसमयोनद्व्यावलिमात्रकाले कृष्टिरूपेण परिणमयिष्यंति समयोनद्व्यावलिमात्रं नवकबंधानुभागं रूपो॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्टिरितिगृहीतव्यं अग्रेप्यनुभूयमानमानादिनवसंग्रहकृष्टीनामिमामेवव्याप्तिंयोजयेत् ।प्रथमसंग्रहकृष्टीरनुभव
न्सर्वकृष्टीरनुभवति ततः कश्चित्पल्का वा इति चेत् । विशेषनिरूपणं क्रियते कृष्टिवेदकस्य प्रथमसमये क्रोधप्रथ
मसंग्रहकृष्ट्यसंख्यातबहुभागमात्रकृष्टय उदयं बंधं वा यांति । कुत्र स्थितास्ता उदयं बंधं वा यांतीति चेत् क्रोधस्य प्र
थमसंग्रहकृष्टिजघन्यकृष्टिमादिं कृत्वा अधस्तनाऽसंख्यातैकभागमात्रीस्पल्का उपरितनस्त क्रोधप्रथमसंग्रहकृष्ट्युत्कृ
ष्टकृष्टेः उपरितनपरितनासंख्यातैकभागमात्रीमुत्का मध्यमासंख्यातबहुभागमात्रमुदयमायांति । तत्कृष्टयः किंल
क्षणा भवंतीति चेत् । अधस्तनपार्श्वतत्कृष्टयोऽनंतगुणा भूत्वा उपरितनपार्श्वतत्कृष्टयोऽनंतगुणहीना भूत्वा प्रथमसंग्रह
कृष्टिमध्यमकृष्टिस्वरूपेणोदयमायांति । क्रोधप्रथमसंग्रहकृष्टेः सकलायामं पल्यासंख्यातेन भक्त्वा एकभागमात्री
पर्यधश्च तत्पल्का शेषबहुभागमात्रमुदयमायांति पुनरासु उदयं पन्नकृष्टेषु मध्ये उपरितनानुदयकृष्टिसोऽधउपरि
मिलित्वा द्विगुणसाधिकमात्रकृष्टीस्पल्का शेषाऽसंख्यातबहुभागमात्रा बंधमायांति । तत्र नेमिचंद्राचार्यप्रियशिष्य
तात्पर्यं मानादीनामपि स्वस्वप्रथमसंग्रहकृष्टेरधस्तनोपरितनाऽसंख्यातैकभागं त्यक्त्वा मध्यमासंख्यातबहुभागमा
त्रो बंधः प्रवर्तति मानादीनां प्रथमद्वितीयतृतीयसंग्रहकृष्टय इदानीमुदयं नायांति । क्रोधस्य प्रथमसंग्रहकृष्टिं विनीतस्य ४७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त व१२।१२ स्वीकृत्य प्रथमस्थितिं कुर्वन्नुदयनिषेके स्तोकं ददाति। अग्रेतननिषेके एतस्मादसंख्यातगुणं ददा
ति २५।३ एवमसंख्यातगुणितक्रमेण गुणश्रेणिं करोति यावत्प्रथमसंग्रहकृष्टिवेदककालाउच्छिष्टावलिमात्रेण।
प्रथमस्थितिरधिका भवति तावत्प्रथमस्थितिचरमनिषेकः एव गुणश्रेणिशीर्षमित्युच्यते पुनः प्राक्तनावशिष्ट
बकखंडेषु स्थितापेक्षया प कृष्टिक्रोधद्वितीयतृतीयसंग्रहकृष्टिद्रव्यमेनिक्षिप्यते एतावद्भवति व१२।१५ इदं अष्टव
र्षमात्रस्थितायामसंज्ञनितसंख्यातावलिनिर्लेपनकारूपो न स्थितायामार्धमात्रविशेषाधिकं २५।३ कृत्वा द्वितीय
स्थित्यादिनिषेके निक्षिप्यमसत्यगुणश्रेणिशीर्षे तत्ज्वादसंख्यातगुणं भवति। इतउपर्यसंख्यातभागमात्रेण विशेष
हीनं ददाति यावदतिस्थापनावलिं प्राप्नोति तावत्। अनेन क्रमेण प्रतिसमयं गलितावशेषे गुणश्रेणिं करोति। कृष्टि
करणकाले या तृतीयसंग्रहकृष्टिः सा कृष्टिवेदके प्रथमसंग्रहकृष्टिरित्युच्यते। अन्यथा कृष्टिकारकस्य प्रथमसंग्र
हकृष्टिवेदकेपि प्रथमसंग्रहकृष्टिरित्युच्यमानेतामनुभूयाग्रतनद्वितीयसंग्रहकृष्ट्यनुभवनकाले पूर्वबंधोदया
भ्यामिदानीतनबंधोदयावनंतगुणौ जायेतां न च तथा प्रतिसमयं बंधोदययोरनंतगुणहानत्वसंभवात्। अतः का
रणकृष्टिकारकस्य तृतीयसंग्रहकृष्टिरेव कृष्टिवेदकस्य प्रथमसंग्रहकृष्टिः प्रथमसंग्रहकृष्टिरेव तृतीयसंग्रह

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नुभयशलाकात्रिगुणितः सन्नुपरितनानुभयकृष्टिप्रमाणं भवति संदृष्टिः ।।१२।४। पुनः पूर्वराशिरेवोपरितनोदय
शलाकात्रिगुणितः सन् अधस्तनोदयकृष्टिप्रमाणं भवति संदृष्टिः ।।१२।३।७ ख२४९।१६ द्वादशसंग्रहकृष्टिस्वस्वप्रथम
समयकृष्टिवेदकं प्रति इदमल्पबहुत्वमुक्तं। सं प्रति द्वितीयसमया ख२४९।१६ प्सरति स्वस्वसंग्रहकृष्टिचरमकृष्टिवेद
कपर्यंतमल्पबहुत्वमुच्यते तद्यथा। अधस्तनानुभयकृष्टयस्तोकाः उदयकृष्टयस्तु विशेषाधिकाः ततः परं पूर्वसमयव
धोक्तकृष्टकृष्टिसमानकृष्टिमादिं कृत्वाऽधोयाऽनुभयकृष्टयस्ता विशेषाधिका ततः अधस्तनं उदयकृष्टयो विशेषाधिका
ः इतायेपूर्वसमयोपरितनोदयजघन्यकृष्टिसमानकृष्ट्याद्या सर्वानुभयकृष्टयः असंख्यातगुणाः कुतः पूर्वसमयो
परितनानुभयकृष्टीनामसंख्यातैकभागमात्रकृष्टीः पूर्वसमयोपरितनोदयजघन्यकृष्टिमादिं कृत्वाऽधोवतार्य सांप्र
तकानुभयकृष्टिर्भवति ततोऽधः पूर्वसमयोपरितनोदयकृष्ट्यसंख्यातैकभागमात्रकृष्टीरवतार्येदानीतनोपरि
तनोदयजघन्यकृष्टिं संलवात् मध्येवंधोदययुक्तकृष्टयोऽसंख्यातगुणा भवंति पुनः पूर्वसमयाधस्तनानुभयकृष्टी
नामसंख्यातबहुभागमात्रकृष्टीस्तासामुक्तकृष्टकृष्टिसमानकृष्टितः अधोऽवतार्य सांप्रतिकबंधजघन्यकृष्टिर्भवति ५०
ततोऽधः पूर्वाधस्तनोदयकृष्ट्यसंख्यातैकभागमात्रकृष्टीरवतीर्य सांप्रतिकोदयजघन्यकृष्ट्यल्पबहुत्वं कथमस्तीति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शेषे द्विसंग्रहकृष्टीः इदानीं बंधमुदयमपि नागच्छंति। क्रोधस्य प्रथमसंग्रहकृष्टेरनुभयोभयकृष्टीनामल्पबहुत्वं कथमस्तीति
चेत् क्रोधप्रथमसंग्रहकृष्टेरधस्तनाः अनंताः कृष्टयो बंधमुदयं च नायांति ताः स्तोकाः तासामंकसंदृष्टिः २ उपरियाः कृष्टयः
उदयमायांति ता विशेषाधिकाः संदृष्टिः ३ अधिकप्रमाणमधस्तनानुभयकृष्टीः पल्यासंख्यातेन भक्ता तत्रैकखंडप्रमा
णमिति ज्ञातव्यं तत्क्रोधप्रथमसंग्रहकृष्टेः उपरितनानुभयाः कृष्टयः उदयं बंधं नायांति ताः विशेषाधिकाः संदृष्टिः ४
अत्रापि विशेषाधिकप्रमाणमुदयकृष्टीः पल्यासंख्यातेन भक्तास्तत्रैकखंडमात्रं भवति ततः याः कृष्टय उदयमायांति
ताः विशेषाधिकाः संदृष्टिः ५ अत्राधिकप्रमाणं उपरितनानुभयकृष्टीः पल्यासंख्यातेन भक्ता तत्र एकखंडमात्रं भवति
मध्ये याः कृष्टयो बंधमुदयं चागच्छंति ताः असंख्यातगुणाः क्रोधप्रथमसंग्रहकृष्टीः पल्यासंख्यातेन भक्ता तत्र बहुखंड १
मुदयकृष्टिप्रमाणं संदृष्टिः [।४।२२ पु ख २४ पु] एकखंडप्रमाणमिदं [।४।२२।१ ख २४ पु] प्रक्षेपयोगोद्धृतमिश्रपिंडप्रक्षेपकाणां गुणको
भवेत्सः इति सूत्रेण पूर्वोक्तसकलशलाकायोगेन भक्ते लब्धमेतावत् [।४।२२ ख२४पु६] इदमधस्तनानुभयश
लाकात्रिगुणितं सत् अधस्तनानुभयकृष्टिप्रमाणं भवति संदृष्टिः [।४।२२।२ ख२४पु६] पुनः पूर्वराशिरेवाधस्तनो
भयशलाकात्रिगुणितं सत् अधस्तनोदयकृष्टिप्रमाणं भवति संदृष्टिः [ख२४पु६] [।४।२२।३ ख२४पु६] पुनः पूर्वराशिरेवोपरितना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कांडकघातोऽश्वकर्णीकारेण प्रवृत्तः इदानीं बादरसंग्रहकृष्टिप्रतिबद्धानां संज्वलनानुभागानां प्रतिसमयमनंत
गुणहान्याऽपवर्तनं प्रवर्त्तत इति तात्पर्यं इतः परि प्रतिसमयं संज्वलनानुभागस्य बंधोदययोः प्रवृत्तिक्रम उच्यते
प्रथमसमयकृष्टिवेदकस्याऽनंतबहुभागमायाः क्रोधप्रथमसंग्रहकृष्टयुदयमायांति तास्तदुदयागतकृष्टि
मध्यात्कृष्टिः कृष्टिः सा बहुभागाक्रांतियुक्ता भवति क्रोधप्रथमसंग्रहकृष्टौ वर्धमानकृष्टयोऽनंतबहुभागमात्राः सं
तितासु वर्धमानकृष्टिमध्यात्कृष्टकृष्टिः सा तदुदयोत्कृष्टकृष्टितोऽनंतगुणहीना द्वितीयसमये तदुदयोत्कृष्टकृ
ष्टिः प्रथमसमयबंधोत्कृष्टकृष्टितोऽनंतगुणहीना ततः द्वितीयसमयस्य बंधोत्कृष्टकृष्टिरनंतगुणहीना ततस्तृती
यसमयस्योदयोत्कृष्टिरनंतगुणहीना ततस्तृतीयसमयस्य बंधोत्कृष्टिरनंतगुणहीना एवमहिगत्या सर्वकृष्टि
वेदककालेऽप्यनुभागाल्पबहुत्वं प्रवर्त्तयति एवं बंधोदययोः उत्कृष्टकृष्ट्यल्पबहुत्वमुक्तं इदानीं बंधोदययजघन्य
परस्थाने स्वकीयाधःस्थितकषायप्रथमसंग्रहे च संक्रमयति स्वस्थाने वा परस्थाने वाऽनुभूतसंग्रहादनंतरोद
ययोग्यसंग्रहे संख्यातगुणतया संक्रमयति अत्र तात्पर्यमुच्यते तद्यथा लोभसंज्वलनवेदकप्रथमसंग्रहकृ
ष्टिद्रव्यमपकर्षणभागहारेणैकैकखंडं प्रथमसंग्रहकृष्टिद्रव्यादधिकं द्वितीयसंग्रहकृष्टिद्रव्यमपकर्ष ५२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दितरकृष्टिवेदकस्यप्रथमसमयेतीव्रानुभागयुतंबंधजघन्यकृष्टिस्तीव्रानुभागयुतात्ततउदयजघन्यकृष्टिरनंतगुण
हीनाद्वितीयसमयेबंधस्यजघन्यकृष्टिःप्रथमसमयोदयजघन्यकृष्टितोऽनंतगुणहीनाततोद्वितीयसमयेउदयज
घन्यकृष्टिरनंतगुणहीनाततस्तृतीयसमयेबंधजघन्यकृष्टिरनंतगुणहीनाततस्तृतीयसमयेउदयजघन्यकृष्टि
रनंतगुणहीनाएवमधिगताकृष्टिवेदकसर्वकालेपिजघन्यानुभागाल्पबहुत्वंप्रवर्त्तते [illegible]धस्यप्रथमसंग्रह
कृष्टे[illegible]व्यानांबंधोदययोःकृष्टजघन्यकृष्टीरात्रित्यागतःइयंप्ररूपणाक्रोधप्रथमसंग्रहकृष्टिवेदकस्यचरमसमय
पर्यंतंज्ञातव्यासातद्द्वितीयतृतीयसंग्रहकृष्ट्यनुभवकस्याप्यनुभागबंधोदयाल्पबहुत्वमेवमस्तीतिसूत्रस्यार्थःअत्रसंक्रमण
द्रव्यस्यसंक्रमोविचार्यतेक्रोधादिसंग्रहद्रव्यंस्वस्थानेस्वस्वतृतीयसंग्रहपर्यंतंकृष्टिर्भवतिततोऽधःपूर्वबद्धस्यानु
नुभयकृष्टीनामसंख्यातिकभागमात्रकृष्टीरवतीर्यअधुनातनानुभयकृष्टिजघन्यकृष्टिर्भवतिएवंप्रतिसमयंपूर्व
पूर्वानुभयोदयोदयानुभयकृष्टिभ्यउत्तरोत्तरानुभयोदयोदयानुभयकृष्टयोऽसंख्यातगुणहीनामध्यालयाःविशेषा
धिकाइतिज्ञातव्यंअत्राप्ययंभावार्थःप्रथमसमयकृष्टिवेदकमादिंकृत्वामोहनीयानुभागानामितःपर्यंतंसमयापवर्त्त
नापवर्त्ततेपूर्वमपूर्वस्पर्द्धककरणकालेकृष्टिकरणकालेचांतर्मुहूर्तकालंप्रतिक्षणंभूत्वासंज्वलनचतुष्टयानुभाग

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धप्रथमद्वितीयसंग्रहकृष्टिद्रव्यं पृथक्पृथगपकर्षणभागहारेणखंडितैकैकभागः तृतीयसंग्रहकृष्टौ संक्रमयति।
ततस्त्याः आयद्रव्याणि त्रे २। क्रोधप्रथमसंग्रहकृष्टिद्रव्यमपकर्षणभागहारेणखंडितैकभागं त्रयोदशगुणित
यात्तदनंतराद्वययोग्यायां तद्द्वितीयसंग्रहकृष्टौ संक्रमयतीति तस्या आयद्रव्याणि १३ शीतफलतरत्वात्तं क्रोधप्रथमसंग्र
हकृष्टेरायद्रव्यं नास्ति आनुपूर्वीसंक्रमणात् अत्र संक्रमणद्रव्यस्यापकर्षणव्यपदेशः कथं जात इति चेत् अनुला
गपेक्षयाहानिसद्भावात्। इत्यायद्रव्यविभागः समाप्तः। व्ययद्रव्यविभागः कथ्यते। क्रोधप्रथमसंग्रहकृष्टितः स्वकीय
द्वितीयतृतीयसंग्रहकृष्ट्योः मानप्रथमसंग्रहकृष्टौ च गतद्रव्याणि मिलित्वा तत्प्रथमसंग्रहकृष्टेर्व्ययद्रव्याणि अष्टोत्तरद्वि
शतं क्रोधतृतीयसंग्रहकृष्टौ मानप्रथमकृष्टौ च गतद्रव्ये द्वे मिलित्वा क्रोधद्वितीयसंग्रहकृष्टेर्व्ययद्रव्ये द्वे लवतः। मानप्र
थमसंग्रहकृष्टौ च गतद्रव्ये द्वे मिलित्वा स्वकीयद्वितीयसंग्रहकृष्टिद्रव्ये द्वे लवतः मायाप्रथमसं गतद्रव्याणि मिलित्वा मायाप्रथ
मसंग्रहकृष्टेर्व्ययद्रव्याणि भवंति। त्रीणि भवंति स्वकीयतृतीयसंग्रहकृष्टौ लोभप्रथमसंग्रहकृष्टौ च गतद्रव्ये द्वे मिलित्वा मा
याद्वितीयसंग्रहकृष्टेर्व्ययद्रव्ये द्वे लवतः। लोभप्रथमसंग्रहकृष्टौ गतद्रव्यमेव मायातृतीयसंग्रहकृष्टेर्व्ययद्रव्यं भवति लो
भद्वितीयसंग्रहकृष्ट्योर्गतद्रव्ये द्वे मिलित्वा स्वकीयप्रथमसंग्रहकृष्टेर्व्ययद्रव्ये द्वे लवतः। निजतृतीयसंग्रहकृष्टौ गतद्र ५२

× संग्रहकृष्टौ गतद्रव्यमेव मान तृतीयसंग्रहकृष्टेर्व्ययद्रव्यं भवति मायाद्वितीयतृतीयसंग्रहकृष्ट्योः लोभप्रथमसंग्रहकृष्टौ च × नि. ४८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णभागहारेणानंतैकखंडं वलोभतृतीयसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्यं तल्लोभप्रथमसंग्रहकृष्टितोपकृ
ष्टितोपकृष्टद्रव्यमेव द्वितीयसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्यमेकं मायाप्रथमद्वितीयसंग्रहकृष्टिद्रव्याणि
अपकर्षणभागहारेण पृथक्पृथग्भक्त्वा तत्रैकैको भागो लोभप्रथमसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्याणि त्रीणि
मायाप्रथमद्वितीयसंग्रहकृष्टिद्रव्ये पृथक्पृथगपकर्षणभागहारेण भक्त्वा तत्रैकैको भागो मायातृतीयसंग्रह
कृष्टौ संक्रमयतीति तस्यायद्रव्ये द्वे तत्प्रथमसंग्रहेणापकृष्टद्रव्यमेव द्वितीयसंग्रहकृष्टौ संक्रमयतीति तद्
द्रव्यमेकं मानप्रथमद्वितीयतृतीयसंग्रहकृष्टिद्रव्याणि पृथक्पृथगपकर्षणभागहारेण भक्त्वा तत्रैकैकखंडं मायाप्रथ
मसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्याणि त्रीणि मानप्रथमद्वितीयसंग्रहकृष्टिद्रव्ये पृथक्पृथगपकर्षणभा
गहारेण भक्त्वा तत्रैकैकखंडं तत्तृतीयसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्ये द्वे तत्प्रथमसंग्रहादपकृष्टद्रव्यमेव
द्वितीयसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्यमेकं क्रोधप्रथमसंग्रहकृष्टिद्रव्यमपकर्षणभागहारेण भक्त्वा
तत्रैकभागस्तत्स्वयोद्वागुणहानिं द्वितीयसंग्रहकृष्टिद्रव्यं ततो विशेषाधिकं तृतीयसंग्रहकृष्टिद्रव्यं पृथक्
पृथगेतेनैव भागहारेण भक्त्वा तत्रैकैकखंडं मानप्रथमसंग्रहकृष्टौ संक्रमयतीति तस्यायद्रव्याणि पंचदशक्रो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तावन्मात्रंभवतिआयद्रव्येसोप्यव्ययद्रव्यादपनीयप्रतिपूरणंकथनंक्रियतेतिचेत्।एकत्रआयोव्ययसमानः।एकत्रआय
व्ययोऽल्पः।एकत्रआयाद्व्ययोधिकः।एकत्रव्ययएवास्तिआयोनास्ति।एकत्रआयएवास्तिव्ययोनास्तीतिकारणात्।परस्थान
गोपुच्छइदानीमपिसंजायमानस्यतःलोभतृतीयसंग्रहघातितावशिष्टचरमकृष्टितस्तद्वितीयसंग्रहजातस्यादिकृष्टेरूपो
धिकनष्टकृष्टिमात्रविशेषहीनवनपाम्यत्एकविशेषहानिमिष्ट्वाविनष्टकृष्ट्यायामप्रमाणविशेषान्निजघातद्रव्यादप
नीयनिक्षिप्तेषुतच्चरमकृष्टितोद्वितीयमादप्रथमकृष्टेरेकविशेषहीनाभवति।अनेनक्रमेणद्वितीयकृष्ट्यादिनिजघा
तितावशिष्टचरमकृष्टिपर्यंतंतावन्मात्रविशेषान्घातद्रव्यतोऽपनीयैकद्रव्येणनिक्षिप्ते।अधस्तनविनष्टकृष्ट्यायामप्रमाण
विशेषविष्कंभेणनिजघातितावशिष्टकृष्टिमात्रायामेनैकमायतचतुरस्रक्षेत्रंनिक्षिप्यते।प्रथमसंग्रहकृष्टेःस्वकीयाधस्तन
संग्रहकृष्टिविषयेविनष्टकृष्ट्यायामप्रमाणविशेषविष्कंभेणनिजघातितावशिष्टकृष्टिमात्रायामेनमायतचतुरस्रक्षेत्रद्वयमा
त्रद्रव्यंनिजघातद्रव्यात्स्वीकृत्यनिक्षिप्तेलोभसंग्रहकृष्टित्रयस्यैकगोपुच्छोभवति।अनेनक्रमेणमायातृतीयसंग्रहकृष्ट्या
धस्तननष्टकृष्ट्यायामप्रमाणविशेषविष्कंभेणस्वस्वघातितावशिष्टकृष्टिमात्रायामेनत्रिचतुःपंचषट्सप्ताष्टनवदशैकाद
शायतचतुरस्रक्षेत्रप्रमाणद्रव्याणिस्वस्वघातद्रव्येभ्यःस्वीकृत्यनिक्षिप्तेषुद्वादशसंग्रहकृष्टीनांस्वस्थानपरस्थानगोपुच्छःसं ५३

Ganesh Varni Digambar Jain Institute, Naria; Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्ययैकमेव निज द्वितीयसंग्रहकृष्टेर्व्ययद्रव्यं भवति तीसरी तृतीयसंग्रहकृष्टेर्व्ययद्रव्यं नास्ति विलोमसंक्रमणाभावात् एवं
व्ययद्रव्यविभागः समाप्तः इतउपरि प्रागुक्तानुसमयापवर्तनाप्रवृत्तिक्रमउच्यते प्रथमसमयकृष्टिवेदकः बाद
रसंग्रहकृष्टीनां चरमकृष्टिमादिं कृत्वा एकैकसंग्रहकृष्ट्यसंख्यातैकभागं घातयति अत्र विशेषार्थनिर्णयः क्रियते
स्वस्वसंग्रहकृष्टीः संस्थाप्य अपकर्षणभागहारादसंख्यातगुणहीनभागहारेण पृथक् पृथक् खंडितासु स्वस्वघातकृष्टिप्रमाण
मायाति संदृष्टिः एतासु घातकृष्टिषु स्वस्वचरमकृष्टिस्थितद्रव्यं संस्थाप्य स्वस्वघातकृष्टिप्रमाणेन संगुण्य विशेषाधिकं कृ
तं सत् स्वस्वघातद्रव्याणि जायंते एवं प्रागुक्तसर्वेषां घातद्रव्याणां संदृष्टि
द्रव्याणि अधस्तनानि व्ययद्रव्याणि ततोऽधस्तनघातद्रव्याणि अत्र व्ययद्र
पुच्छेन ष्टघातद्रव्यात् परस्थानगोपुच्छेन ष्टः ततः कारणात् स्वस्वघात
तैकभागहीनं कृत्वाऽपनीय प्रतिपूरणे कृते स्वस्थानगोपुच्छो जायते हीनप्र
स्वस्वाग्रकृष्टिप्रविष्टद्रव्यं संस्थाप्य स्वस्वव्ययद्रव्यागमन कारणभूतेनापक

घलो ख व २४ ३ / व	याष ख व २४ ३ / व	घमा ख व २४ ३ / व	घलो ख व २४ ३ / व
६ ख व २४ ३ / व	६ ख व २४ ३ / व	४ ख व २४ ३ / व	६ ख व २४ ३ / व
४ ख व २४ ३ / व	४ ख व २४ ३ / व	४ ख व २४ ३ / व	४ ख व २४ ३ / व

अत्रोपरितनानि आय
द्रव्याणि स्वस्थानगो
पुच्छे स्वस्वव्ययमसंख्या 1
भागं क्रियदिति विवक्षि
र्षणभागहारेण भक्ता
स्वस्वविनष्टकृष्ट्यायामेन संगुण्य साधिकं कृतं सत्

व१२।२ २४ ३	व१२।१ २४ ३	व१२।२ २४।३	व१२।२ २४ ३	व१२।२ २४।३	व१२।२ २४ ३	व१२।२ २४ ३	व१२।१ २४ ३	व१२।२ २४ ३	व१२।२ २४ ३	व१२।२ २४ ३	०	आय द्रव्य
०	व१२।१ २४ ३	व१२।२ २४ ३	व१२।२ २४।३	व१२।२ २४ ३	व१२।२ २४ ३	व१२।२ २४ ३	व१२।२ २४ ३	व१२।२ २४ ३	व१२।१ २४ ३	व१२।२ २४ ३	व१२।२ २४ ३	व्यय द्रव्य
व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	व १२ २४ ३ / व	घात द्रव्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्त्यमानाः पल्यासंख्यातैकभागगुणिताः कृताः एकसमयप्रबद्धमात्रं वंधद्रव्यापकर्षणं गुणहानिमात्रसमयप्रबद्धानाम
संख्यातैकभागमात्रसंक्रमणद्रव्यस्यासंख्यातगुणत्वात् निर्वर्त्यमानकृष्टीनां द्रव्यानुसारेणाल्पबहुत्वसंभवा
त् वर्धमानद्रव्येण निर्वर्त्यमानकृष्टीः क्व तु करोति इत्याशंकायाः कृष्टयो वर्धमानद्रव्येण निर्वर्त्यंते तास्वित्युक्तः अधस्तनसंग्र
हकृष्टिषु करोति ताः कृष्टीस्तत्त्वतः संग्रहकृष्टीनामधः करोति मध्ये वा इति चेत् एकैकसंग्रहकृष्टेरवयवकृष्टीना
मध्ये करोति सर्वेषां येषां वकृष्टीनां मध्येषु करोति न वा इति चेत् न सर्वेषां अवयवकृष्टीनां मध्येषु करणप्रसंगेकतित्रवय
वकृष्टिमध्येषु अपूर्वकृष्टीर्निर्वर्तयति इति चेत् अत्र निर्णयः क्रियते वर्धमानसंग्रहाणामधः उपर्यपि असंख्या
तैकभागमात्रप्रत्येकमध्ये वर्धमानकृष्टीनां यत्प्रथम[illegible]ध्यंतरं तत्र न द्वितीयकृष्ट्यंतरेऽपि न तृतीयकृष्ट्यंतरेऽपि न एवं प
ल्यस्यासंख्यातप्रथमवर्गमूलमात्रकृष्ट्यंतराण्यतीत्यैकामपूर्वकृष्टिं निर्वर्तयति पुनरपि तावन्मात्रकृष्ट्यंतराण्यत्र
तीत्यैकैकामपूर्वकृष्टिं निर्वर्तयति यावदधोऽधःकृष्टेरधः पल्यस्यासंख्यातप्रथमवर्गमूलमात्राया अनवतीर्य वंधद्र
व्यनिर्वर्त्यमानापूर्वकृष्टीनामुत्कृष्टिकृष्टिरुत्पद्यते तावत् इतः उपरि वर्धमानप्रदेशसमूहस्य निषेकश्रेणिनिरूपणं ५४
क्रियते अत्र वर्धमानजघन्यकृष्टौ बद्धद्रव्यं निक्षिपति रूपोनकृष्ट्यायामार्धहीनद्विगुणहान्या गुणितस्वकीयकृष्ट्या

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्णो जायते॥ पुनरपि सकलमध्यमखण्डानि मेलयित्वा प्रवर्त्तिते साधिकनवगुणितं जायते संदृष्टि व ४ १ ६ सकलघा
तद्रव्ये मिलिते एतावत् व ४ ९ सकलमध्यमद्रव्ये अत्रायतचतुरस्रक्षेत्ररूपेण निक्षिप्तद्रव्ये चयघातद्रव्यमास्त्रीकृते
असंख्यातबहुभागमात्रद्रव्य ९ मवशिष्यते इदं प्रथमसमयघातितावशिष्टसर्वकृष्ट्यायामेन रूपोनगच्छार्द्धहीनद्वि
गुणहान्या च न्यूनत्वात् सकलकृष्ट्यायामसंकलनेन न संगुणप्रस्थास्मिन्निक्षेपणीयशेषद्रव्यं सर्वकृष्ट्यायामेन तत्का एकखं
डस्य तागहारमात्रमेव गुणकारं कृत्वा तत्रैकखंडं पूर्वोक्तसंकलनायां च सकलकृष्ट्यायाममात्रविशेषान् गृहीत्वा लि
जघन्यकृष्टौ निक्षिप्ते द्वितीयकृष्ट्यादिकखंडं पूर्वोक्तसंकलनायां च रूपोनसकलकृष्ट्यायाममात्रविशेषान् गृहीत्वा तत्
यकृष्टिमादिं कृत्वा अधस्तनसर्वकृष्ट्युत्कृष्टपर्यंतं निक्षिप्ते अवशिष्टघातद्रव्यं सर्वं समाप्नोति सर्वत्रापि एकगोपुच्छं भ
वति वर्द्धमानक्रोधप्रथमसंग्रहकृष्टेः स्वघातद्रव्यस्यासंख्यातैकभागं एतत्कंडका अवशेषसर्वघातद्रव्यमेकगोपुच्छाका
रेण निक्षिप्ते इत्येकगोपुच्छस्वरूपावस्थितत्वात् द्वादशसंग्रहकृष्टीनां मध्ये क्रोधप्रथमसंग्रहकृष्टिं विना शेषैकादशसंग्रह
कृष्टीनां संक्रमणद्रव्येण यथासंभवं बध्यद्रव्येण वा पूर्वकृष्टीः करोतीत्यर्थः। अत्र वर्द्धमानद्रव्येण निर्वर्त्यमानाः कृष्टयो
वा संक्रम्यमाणद्रव्येण निर्वर्त्यमाना वा इति चेत् वर्द्धमानद्रव्येण निर्वर्त्यमानाः कृष्टयः स्तोकाः संक्रम्यमाणद्रव्येण निर्व

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्टीनां मध्ये ष्ठयाः कृष्टयः कृताः ता असंख्यातगुणाः संग्रहकृष्टीनामधःयाः कृष्टयः क्रियंते तासां पूर्वकृष्टिकारकद्वितीय
समये निर्वर्त्यमानाः पूर्वकृष्टीनां यद्विधानमुक्तं तन्निरवशेषतया कर्त्तव्यं अल्पविशेषोस्तिसक इति चेत् इदानीं क्रियमा
णाधस्तनाः पूर्वकृष्टीनां वरकृष्टौ दीयमानप्रदेशासमूहात् पूर्वजघन्यकृष्टौ दीयमानप्रदेशासमूहः कृष्टिकारके असंख्या
तभागहीनः स्यात् इदानीमसंख्यातगुणहीनमस्ति कुतः संप्रति अधस्तनकृष्टिद्रव्यात् मध्यमखंडद्रव्यस्यासंख्यातगुण
हीनत्वात् पुनरपि पूर्वकृष्टीनां वरमकृष्टौ दीयमानप्रदेशाद पूर्वकृष्टीनां जघन्यकृष्टौ दीयमानप्रदेशाः कृष्टिकारके
संख्यातभागाधिकः स्यात् इदानीमसंख्यातगुणोभवत् कुतः कृष्टिवेदके मध्यमखंडादधस्तनकृष्टेरसंख्यातगुणत्वा
त् अवयवकृष्टीनां मध्ये ष्ठयाः कृष्टयः क्रियंते तासां पूर्व[illegible]वध्यमानप्रदेशेन निर्वर्त्यमानानाम पूर्वकृष्टीनां यद्विधानं कृ
तं तत्सर्वं निरवशेषं क्रियते अल्पविशेषः सक इति चेत् बंधद्रव्येण निर्वर्त्यमानाः पूर्वकृष्टितः स्तोकतरकृष्ट्यंतराणि प
तिक्रम्य संक्रम्यमाणप्रदेशासमूहेन निर्वर्त्यमानाः पूर्वकृष्टिष्वंतरेष्वपमानान् भवति कृतानि कृष्ट्यंतराणि गणनया पल्यप्रथ
मवर्गमूलस्यासंख्यातैकभागमात्राणि अपकर्षणोत्कर्षणभागहारमात्राणीत्यर्थः अत्र तात्पर्यं निरूपणं क्रियते त
द्यथा लोभसंज्वलनस्य तृतीयसंग्रहकृष्टेरायद्रव्यादेकादेकोत्तर निजरूपोनगच्छसंकलनमात्रपूर्वविशेषान् ग ५५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यामेनवध्यमानद्रव्यस्यानंतैकभागमात्राधिगुणहान्यासंगुणेपनिक्षिपतीसर्व्वं॥ द्वितीयकृष्टौ अनंतभागरूपेण वि
शेषेण हीनं निक्षिपति॥ तृतीयकृष्टावनंतभागरूपेण विशेषेण हीनं निक्षिपति॥ चतुर्थकृष्टावनंतभागरूपेण विशे
षेण हीनं निक्षिपति एवमध्यवधानेन पूर्वकृष्टिप्रतिवद्धकृष्टिषु विशेषहीनं निक्षिपति यावत् पूर्वकृष्टिं प्राप्नोति
तावत् अत्र उपरिस्थितमकृष्टौ दत्तद्रव्यात् पूर्वकृष्टावनंतगुणं ददाति॥ अपूर्वकृष्टेः सकाशात् यानंतरकृष्टिः तस्या
मनंतगुणहीनं ददाति तत उपरि सर्वकृष्टिषु अनंतभागरूपेण विशेषेण हीनं ददाति यावत् सल्पासंख्यातप्रथमवर्गस्थू
लमात्रकृष्टीरतीत्य उपरि एकाम् पूर्वकृष्टिं निर्वर्तयति तावत् एवं सर्वकृष्टिषु नवकबंधद्रव्यस्य निषेकप्ररूपणं ज्ञा
तव्यं॥ अनेन प्रकारेण नवबंधद्रव्यकृता ऽपूर्वकृष्टयोपि अनंता भवंति॥ एवं बंधकृष्टिस्वरूपं निरूपितं इदानीं संक्रमणकृ
ष्टिस्वरूपं निरूप्यते॥ संक्रमणप्रमाणप्रदेशसमुद्भात् या कृष्टयो निर्वर्तिता स्ताः द्वयोः स्थानकयोर्निर्वर्तंति किं तत्स्थानद्व
यमिति चेत्॥ अवयवकृष्टीनां मध्ये संग्रहकृष्टीनामधश्च करोति॥ तत्र प्रथमसंग्रहकृष्टिं विनाशेषसर्वैकादशसंग्रहकृ
ष्टीनामधस्तनदसंख्यातभागमात्राः अधस्तनकृष्टीनाम्नीः पूर्वकृष्टीः करोति तदेकादशसंग्रहकृष्ट्यवयवकृष्टिमध्ये
षु संक्रमणांतरकृष्ट्याख्याः पूर्वकृष्टीः करोति॥ तथा संग्रहकृष्टीनामधः या कृष्टयः कृतास्ताः स्तोकाः॥ अवयवकृ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यद्भागदमनीयहृथक्कंसंस्थापयेत्क्रोधस्यप्रथमसंग्रहकृष्टेः घातद्भागदपनीयपृथक्कंसंस्थापयेत् एतानिसंक्रमणद्रव्य
प्रतिबद्धमध्यमखंडनामानिभवंति संदृष्टिः उनरप्पिकमध्यमखंडद्रव्या
धिकंलोभसंज्वलनस्यतृतीयसंग्रहकृष्टेः प्रथमकृष्टिद्रव्यंसंस्थाप्यक्रोधप्रथम
संग्रहकृष्टिंविनाशेषैकादशसंग्रहकृष्टीनांस्वस्वकृष्ट्यायामानपकर्षण
भागहारादसंख्यातगुणेनपल्यासंख्यातेनखंडैकभागेनसंगुणएपस्वस्वाय
द्रव्येभागहाराचा पृथक्कंसंस्थापयेत् एतानिसंग्रहाणामधोनिर्वर्तमानकृ
मकृष्टिप्रतिबद्धसमानखंडनामानि संदृष्टिः उनरप्पिकाद्येकोत्तरनिज
वेद्यमानसर्वकृष्ट्यायामसंकलनामात्रोलयद्रव्यप्रतिबद्धविशेषाखनि
जैकविशेषानंतैकभागहीनान्क्रोधसंज्वलनप्रथमसंग्रहकृष्टिघातद्रव्या

व१२ ध- ध३वव ख२ध ख	व१२ ध- ध३वव ख२ध ख	व१२ ध- ध-३वव ख२ध	व१२ ध- १२ ध३वव ख२ध ख
व१२ ध- ध३वव ख२ध ख	व१२ ध- ध३वव ख२ध ख	व१२ ध- ध-३वव ख२ध ख	व१२ ध- ध-३वव ख२ध ख
व१२ ध- ३वव ख२ध ख	व१२ ध- ३वव ख२ध ख	व१२ ध- ध३वव ख२ध ख	व१२ ध- ध-३वव ख२ध ख
लो	या	मा	क्रो
व१२ ध- ध ख२ध३व ख	व१२ ध- ध ख२ध३व ख	व१२ ध- ध ख२ध३व ख	०
व१२ ध- ध ख२ध ३व ख	व१२ ध- ध ख२ध३व ख	व१२ ध- ध ख२ध३व ख	व१२ ध- ध-ख२ध३व
व१२ ध- ध- ख२ध३व ख	व१२ ध- ध ख२ध३व ख	व१२ ध- ध ख२ध३व ख	व१२ ध- ध ख२ध३व ख

द्गृहीत्वापृथक्कंसंस्थापितेषुतद्घातद्रव्यंसमाप्तं॥ ॥उनरपिरूपाधिकातीतकृष्ट्यायामाद्येकोत्तरनिजपूर्वापूर्वकृष्ट्याम ५६
संकलनामात्रोलयद्रव्यप्रतिबद्धविशेषानिजद्वितीयसंग्रहकृष्ट्यायद्रव्याद्गृहीत्वापृथक्कंसंस्थापयेत् एवंक्रोधस्यप्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हीनाद्यथकलस्थापयेत्पूर्वविशेषप्रमाणंकिमितिचेत्क्रोधगततदानींतनसर्वद्रव्यस्वरूपोनाद्धार्धेनहीनचिगुणहा
नागुणितघातितावच्छिष्टसर्वकृष्ट्यायानेनक्रमेतावद्भवति।संदृष्टिः व१२ / ९१६-४ / ख ख२ इदंविंशतिकलाउनरपिअतीत
कृष्ट्याद्यासमात्रविशेषान्आदिंकृत्वानिजकृष्ट्यायामंगच्छकृत्वापूर्वोक्तसं कलनासूत्रेणधनमानीयद्वितीय
संग्रहकृष्टेरायद्रव्यादपनीयपृथक्संस्थापयेत्।लोभसंप्रथमसंग्रहकृष्टिमादिंकृत्वासंग्रहकृष्टीनांस्वस्वातीतकृ
ष्ट्यासमात्रविशेषानादिंकृत्वास्वस्वकृष्ट्यायामंगच्छंकृत्वासंकलयास्वस्वायद्रव्येसोगहीनाद्यथकंसंस्थापयेत्क्रोध
वेदकप्रथमसंग्रहकृष्टेरायद्रव्यानावासूर्वपरस्थानगोपुच्छपूरणकालेपृथग्निक्षिप्तयातद्रव्यान्निजसंकलनाद्रव्यंग
हीनादृथकंसंस्थापयेत्पुनःएतानिसंक्रमणद्रव्याणिभवति
घाधस्तनशीर्षद्रव्यविशेषनामानिभवंति।संदृष्टिः।अनर
पिलोभसंकलनस्पर्द्धतीयसंग्रहकृष्टेःप्रथमकृष्टिसं
स्थाप्यापकर्षणभागहारादसंख्यातगुणेनपल्यासंख्या
तभागेनभक्त्वाएकखंडस्वस्वकृष्ट्यद्धनासंगुणपस्वस्वा

वि छ= ४- ५ ख२४ ख२४ १२	वि छ= ४- ११ ख२४ ख२४ १२	वि छ= ४- २७ ख२४ ख२४ १२	वि छ= ४- ६५५= ख२४ ख२४ २फ
वि छ= ४- १ ख२४ ख२४ २	वि छ= ४- ९ ख२४ ख२४ २	वि छ ४- १५ ख२४ ख२४ १२	वि छ= ४- २२ ख२४ ख२४ २
=वि छ= ४- १ ख२४ ख२४ २	वि छ ४ ७ ख२४ ख२४ २	वि छ= ४- १३ ख२४ ख२४ २	वि छ= ४- १९ ख२४ ख२४ २
लो	या	मा	क्रो
वि छ= ४ ६७ ख२४ ख२४ १२	वि छ= ४ ६१ ख२४ ख२४ २	वि छ= ४ २५ ख२४ ख२४ २	वि छ ४ २९ ख२४ ख२४ २
वि छ ४ ४५ ख२४ ख२४ १२	वि छ= ४ ३९ ख२४ ख२४ २	वि छ= ४- ३३ ख२४ ख२४ २	वि छ ४- २८ ख२४ ख२४ १२=
वि छ= ४ ६३ =ख२४ ख२४ १२	वि छ= ४- ३७ ख२४ ख२४ २	वि छ ४ ३१ ख२४ ख२४ २	वि छ= ४-११६९ ख२४ ख२४ १२=

गा४
ख२४
वा वि
आ ख=
गा४-१३
ख२४
वा वि
आ=

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षैकभागस्यतच्छलाकाएवगुणकारस्वरूपेणस्थापयेत्‌एतानिसंक्रमणांतरकृष्टिप्रतिबद्धसमानखंडद्रव्यनामानि
भवंतिसंदृष्टिः।एवंसंक्रम्यमाणप्रदेशैर्निर्वर्त्यमानकृष्टीनांद्रव्यविभंजनविधानमुक्तं।इदानींबध्यमानप्रदेशैर्नि
र्वर्त्यमानकृष्टीनांद्रव्यविभंजनंक्रियते तद्यथा मोहनीयस्यैकसमयप्रबद्धंसंस्थाप्यावल्यसंख्यातभागेनभक्त्वाए
कभागमपनीयशेषबहुभागद्रव्यंसमानतयाचतुःपुंजान्कृत्वाऽपनीतैकभागमावल्यसंख्यातेनभक्त्वाएकभा
गमपनीयशेषबहुभागंप्रथमपुंजेदत्तेलोभसंज्वलनैकसमयप्रबद्धप्रमाणंभवति।अपनीतैकभागमावल्य
संख्यातेनभक्त्वाएकभागमपनीयबहुभागेषुद्वितीयपुंजेदत्तेषुमायासंज्वलनैकसमयप्रबद्धप्रमाणंभवति
तमपनीतैकभागमावल्यसंख्यातेनभक्त्वाएकभागमपनीयबहुभागेषुतृतीयपुंजेदत्तेषुक्रोधसंज्वलनैकस
मयप्रबद्धप्रमाणंभवति।शेषैकभागेचतुर्थपुंजेदत्तेमानैकसमयप्रबद्धप्रमाणंभवेत्।एतेषुद्रव्येषुपूर्वोक्तबंधां
तरविशेषसंकलनांपूर्वैकविशेषानंतैकभागमात्रद्रव्यंचापनीयत्रैराशिकंक्रियते।तद्यथा।एकमध्यमखंडद्र
व्याधिकलोभसंज्वलनतृतीयसंग्रहकृष्टेर्जघन्यकृष्टिमात्रद्रव्यस्य।स ४।एकबंधांतरकृष्टिशलाकातदाऽएता ५७
वद्द्रव्यस्य।सु ४।किमितित्रैराशिकेकृतेषड्गुणहानिभिःपूर्वसर्वकृष्ट्यायाम ख ४ भक्तात्त्रैकभागमात्रोबंधांतरकृष्टिं

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तीयसंग्रहकृष्टिमादिंकृत्वा द्वराशसंग्रहकृष्टिनिजनिजातीतरूपाधिककृष्ट्यायामध्येकोत्तरनिज २ रूपवर्धितवृष्ट्यायाम
संकलनमात्रोत्तरद्रव्यप्रतिबद्धविशेषान्स्वस्वायद्रव्येस्योगृहीत्वा पृथक्संस्थापयेत्तावदधस्तनसंग्रहकृष्टिपुनिजैकवि
शेषान्नैकनगहीतानग्रहीत्वा पृथक्संस्थापयेदित्ययमर्थो विशेषो ज्ञातव्यः एतान्युत्तरद्रव्यप्रतिबद्धविशेषनामानि
संदृष्टिः एतेः संक्रमणद्रव्यप्रतिबद्धचयविधद्रव्यैर्हीनस्वस्वायद्रव्याणि संस्थाप्य संक्रमणांतरकृष्ट्यानयननिमित्तंत्रैरा
शिकं क्रियते तद्यथा एकमध्यमखंडाधिकस्पलोगसंकलनतृतीयसंग्रहस्यजघन्यसंग्रहकृष्टेः संदृष्टिः ख२४ रिता
वद्द्रव्यस्यैकतिरकृष्टिशलाकातदा ख२१२ एतावन्मात्रलोगसंकलनतृतीयसंग्रहकृष्टिप्रतिबद्धविशेषा ख४ यद
व्यस्यकिमितित्रैराशिकेकृतेलब्धाःसं २४३ क्रमणांतरकृष्टिशलाका एतावसंतवंतिसंदृष्टिशेषद्वराशसंग्रहकृ
ष्टीनामपिस्वस्वविशेषायद्रव्याणीत्राशिकृत्वा ऽनेनक्रमेणत्रैराशिकेकृतेलब्धाः संक्रमणांतरकृष्टिशलाकाः सं

४ ख२४३ २	४ ख२४३ १	४ ख२४३ ३	४ ख२४३ २	४ ख२४३ १	४ ख२४३ ३	४ ख२४३ २	४ ख२४३ १	४ ख२४३ १५	४ ख२४३ १४	४ ख२४३ १८२

दृष्टिः एतानि शलाकानि स्वस्वसंग्रहकृष्टीणामाया
मिन्नकेस्वस्वसंक्रमणांतरकृष्टीनामंतराणिभवंति

३	३	३	३	३	३	३	३	३	३	३
२	१	३	२	१	३	२	१	१५	१४	१८२

तेषां संदृष्टिः अत्र संक्रमणांतरकृष्टिशलाकानि स्वस्वायद्रव्यविशेषेभक्तेल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ताद्धहीनसर्वाद्यमात्रविशेषांश्चगृहीत्वाददाति॥ इत्ययमर्थः सर्वत्रापियोज्यः॥ तदुपरितनांतरसंक्रमणांतरकृष्टिप्र
तिबद्धसमानखंडद्रव्येष्वेकखंडसंक्रमणांतरकृष्टिप्रतिबद्धानयद्रव्यविशेषेभ्योऽतीताद्धहीनसर्वाद्यमात्रविशे
षांश्चगृहीत्वाददाति॥ तद्व्रतदधस्तनपूर्वकृष्टिद्रव्यादसंख्यातगुणं॥ कुतः॥ रूपोनातीतपूर्वकृष्ट्याममात्रपूर्ववि
शेषाधिकमध्यमखंडहीनसमानखंडस्याधस्तनपूर्वकृष्ट्यासमानस्यततोऽसंख्यातगुणत्वात्॥ तत्रयद्रव्यविशेषेण
पिहीनत्वात्॥ तदुपरितनपूर्वकृष्ट्यावधस्तनशीर्षविशेषेभ्योऽतीतपूर्वकृष्ट्यायाममात्रविशेषान्मध्यमखंडस्यैक
खंडस्यैकखंडमुत्तयद्रव्यविशेषेभ्योऽतीताद्धहीनसर्वाद्यमात्रविशेषांश्चगृहीत्वानिक्षिपेत्॥ संक्रमणांतरकृष्टिद्रव्यद
व्याद्संख्यातगुणहीनमेव॥ कुतः॥ अतीतपूर्वकृष्ट्यायाममात्रपूर्वविशेषाधिकमध्यमखंडस्योपरितनपूर्वकृष्टिसमा
नात्तद्धनसमानखंडादसंख्यातगुणहीनत्वात्॥ तदुपरिपूर्वकृष्टिषु अधस्तनशीर्षविशेषेभ्योऽतीतकृष्ट्यासमानात्तद्धन
समानखंडादसंख्यातगुणहीनत्वात्॥ तदुपरिपूर्वकृष्टिषु अधस्तनशीर्षविशेषायाममात्रविशेषान्मध्यमखंडस्यै
केकखंडमुत्तयद्रव्यविशेषेभ्योऽतीताद्धहीनसर्वाद्यमात्रविशेषांश्चगृहीत्वानिक्षिपेन्नाद्भुतं॥ तदुपरितनपूर्वकृष्ट्यावध ५८
स्तनयावदपकर्षणभागहारस्यार्धमात्रकृष्टीरतिक्रम्यतितावत्तदुपरितनांतरसंक्रमणांतरकृष्टिप्रतिबद्धस

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतनकृष्टिष्वुदीयमानद्रव्यादुत्कृष्टादुपरस्थमस्तनखंडेस्यएकखंडमध्यमखंडेस्यएकखंडमुभयद्रव्यविशेषेस्यो ऽ
तीतायामहीनसर्वस्यांममात्रविशेषांश्चगृहीत्वा द्वितीयकृष्टौ निक्षिपति तद्विशेषहीनं भवति अनेन क्रमेणाधस्तन
खंडेस्यएकैकखंडं मध्यमखंडेस्यएकैकखंडमुभयद्रव्यविशेषेस्यो ऽतीतायामहीनसर्वाद्यमात्रविशेषांश्चगृहीत्वा तृ
तीयादिकृष्टौ निक्षिपति यावदपूर्वकृष्टीनां चरमकृष्टिस्तावत् तत्रैव तदधस्तनखंडप्रतिवद्धद्रव्यं समाप्तं ॥ ॥ अन
स्तनमध्यमखंडेस्यएकखंडमुभयद्रव्यविशेषेस्यो ऽतीताद्धहीनसर्वद्धिमात्रविशेषांश्चगृहीत्वा पूर्वकृष्टीनां प्रथमकृष्टौ २
दत्ते अवरमपूर्वकृष्टिद्रव्याद्दिमसंख्यातगुणहीनं कुतः कृष्टिवेदके मध्यमखंडादधस्तनकृष्टेरसंख्यातगुणत्वा
दुभयद्रव्यविशेषेणापि हीनं भवति उपरधस्तनशीर्षपूर्वद्रव्यविशेषस्यएकविशेषं मध्यमखंडेस्यएकखंडमुभ
यद्रव्यविशेषेस्यो ऽतीताद्धहीनसर्वद्धिमात्रविशेषांश्चगृहीत्वा तद्वितीयकृष्टौ निक्षिपति तद्विशेषहीनं भवति। ही
नप्रमाणं कियदिति चेत् पूर्वविशेषहीनोभयद्रव्यविशेषमात्रं अनेन क्रमेण तृतीयादिकृष्टौ ददाति यावदपकर्ष
णभागहारस्यार्धमात्रपूर्वकृष्टीः रतिक्रामति तावत् अल्पविशेषः संकष्टतिचेत् पूर्वकृष्टिद्रव्यं निक्षिपति तद
ऽधस्तनशीर्षपूर्वविशेषेस्यो ऽतीतपूर्वकृष्ट्यायाममात्रविशेषान्मध्यमखंडेस्यएकखंडमुभयद्रव्यविशेषेस्यो ऽती

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यद्द्रव्यविशेषेषु एषामवस्थानमस्तीति ज्ञातव्यं पुनरपि अपनीतशेषवंकपेडद्रव्याणि स्वस्ववंधांतरकृष्टिशलं १
काखिन्नत्का एकखंडस्य प्रमाः एवशलाकाः गुणकारकस्वरूपेण संस्थापयेत् एतानि वंधांतरकृष्टिपमानरवं
डद्रव्यसंज्ञानि संदृष्टिः

वि४। ४	वि४ ४	वि४ ४	वि४ ४
ख२४ख२४।	ख२४ख२४	ख२४ख२४	ख२४ ख२४।२

पुनरपि पूर्वं दृष्टधस्थितिसमनवकवंधसमयप्रवद्धानं
तिकभागं स्वस्ववंधकृष्टि हूनारूपोनाद्धार्द्धहीनद्विगुणगुणहान्यागुणितेनल
क्षाएकभागं वंधकृष्ट्यायामे संकलनया संगुणय स्वस्वनवकवंधसमयप्रवद्धानंतैकभागादपनीय एवकं।
स्थापयेत् एतानि वंधविशेषसंज्ञानि संदृष्टिः

वि४। ४	वि४ ४	वि४ ४	वि४ ४ १६०
ख२४ख४।२	ख२४ ख२४।२	ख२४ख२४।२	ख२४ख२४।२

पुनरप्यपनीतशेषद्रव्या
णि स्वस्ववंधकृष्ट्यद्धानान्नत्काएकभागस्पतमेवा हानंगुणकारस्वरूपेण सं
स्थापयेत् एतानि वंधमध्यमखंडसंज्ञानि संदृष्टिः

स ४	स ४	स ४	स ४।२
ख४ख२४	४ख४ख२४	४ख४ख२४ ख२४	४ख४ख२४।२

एवंस्थितद्रव्येषु प्रथमसं
कृष्टितोलोभप्रथमसंग्रहकृष्टौसंक्रमणप्रदेशसमूहोविशेषाधिकः।मायातृतीयसंग्रहकृष्टितोलोभप्रथमसंग्रहकृ
ष्टौसंक्रमणप्रदेशसमूहोविशेषाधिकः लोभप्रथमसंग्रहकृष्टितोलोभद्वितीयसंग्रहकृष्टौसंक्रमणप्रदेशसमूहोवि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वतिःप्रतिसमयमनंतगुणविशुद्ध्याप्रवर्द्धमानोयंमुनिःप्रतिसमयमसंख्यातगुणप्रदेशसमूहमपकृष्यसूक्ष्मसां
परायकृष्टीःकरोतीत्यभिप्रायः।इदमल्पबहुत्वंपूर्वोक्तं तथापिसंबंधत्वात्तयितुंपुनरुक्तं।अनेनपूर्वोक्तक्रमेण
लोभद्वितीयसंग्रहकृष्टिवेदकस्यप्रथमस्थितौसमयाधिकावलिरवशिष्यतेतदाचरमसमयानिवृत्तिकरणोजा
यतेतदालोभतृतीयबादरसांपरायकृष्टिःपरमुखेनसंक्रम्यमाणासतीसूक्ष्मकृष्टिरूपेणसाकल्येनसंक्रांता
जातालोभद्वितीयकृष्टावपिसमयोनद्व्यावलिमात्रनवकबंधसमयप्रबद्धान्समयाधिकोच्छिष्टावलिप्रविष्टबादर
कृष्टिंचमुक्त्वाशेषद्वितीयसंग्रहकृष्टिःपरमुखेनसंक्रांताद्रव्यार्थिकनयापेक्षया।ऽस्मिन्समयेसंक्रांताजातेत्युक्ता
पर्यायार्थिकनयापेक्षयातुअग्रेतनसमयेद्विसमयोनद्व्यावलिमात्रनवकबंधान्उच्छिष्टावलिप्रविष्टंचमुक्त्वात
च्छेषबादरकृष्टिप्रतिबद्धसर्वद्रव्यंसूक्ष्मकृष्टिस्वरूपेणसंक्रांतमितिज्ञातव्यं।इदानींसर्वकर्म्मणांस्थितिबंधस्थिति
सत्त्वप्रमाणमुच्यते।तदनिवृत्तिकरणस्यचरमसमयेलोभसंज्वलनस्यजघन्यस्थितिबंधोंतर्मुहूर्त्तमात्रः।अत्रैवमो
हनीयस्यबंधव्युच्छित्तिर्जातेतिज्ञातव्या।घातित्रयस्यस्थितिबंधःकिंचिन्न्यूनदिवसमात्रः।पूर्वंदिवसपृथक्त्वमात्र ७९
स्थितिबंधःक्रमेणहीयमानइदानींमुहूर्त्तपृथक्त्वप्रमाणोजातइत्यर्थः।नामगोत्रवेदनीयानांबादरसांपरायस्यच

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तउपर्यंतमंतर्मुहूर्त्तप्रमितनिजगुणश्रेणिशीर्षपर्यंतमसंख्यातगुणितक्रमेणस्थितनिजगुणकारशलाकातिरेकस्तां
संगुण्यएतावन्मात्रमसंख्यातगुणंश्रेणिरूपेणददातिगुणकारशलाकानांसंदृष्टि:१।४।४४।४४४।गुणसंकलितध
नस्यांकसंदृष्टि:८५सूक्ष्मसांपरायेणक्रियमाणगुणश्रेण्यायाम:अंतर्मुहूर्त्तप्रमित:सूक्ष्मसांपरायकालाद्विशेषाधि
कस्तथापिज्ञानावरणादीनांतत्कालेस्ताविगलितावशेषगुणश्रेण्यायामादंतर्मुहूर्त्तेनहीन:इयमेवस्थितगुणश्रेणि
रितिज्ञातव्यागुणश्रेणिशीर्षाद्उपरिस्थितावधानस्थितिरंतरस्थितिंगुणश्रेणिशीर्षद्रव्यादसंख्यातगुणंददा
तिततउपरिविशेषहीनंददातियावत्पूर्वसमयेयदंतरायामप्रमाणंस्थितिचरमांतरस्थितिस्तावच्चरमांतरस्थि
तौद्रव्यात्पूर्वसमयेयावद्द्वितीयास्थिति:तस्याआदिस्थितौदीयमानद्रव्यसमूहासंख्यातगुणहीना:तउपरित
नस्थितौविशेषहीनंभवतिअत्रतात्पर्यमिदमुच्यतेतत्यथाअंतरदीर्घप्रमाणंसर्वत:स्तोकंसंदृष्टि:।२२४स्थितिकां
डदीर्घप्रमाणंसंख्यातगुणंसंदृष्टि:।२२४।४स्थितिकांडकाधस्तनस्थितिदीर्घप्रमाणंसंख्यातगुणंसंदृष्टि:२८।४।४।
४द्वितीयस्थितिसमस्तदैर्घ्यमिदं।२८।४।२०अंतरस्थितिदैर्घ्येणद्वितीयस्थितिदैर्घ्येभक्तेलब्धमेतावत्।२ख अनेनसं ८०
ख्यातराशिनापूर्वदृष्टअपकर्षितद्रव्यभागद्रव्यमिदं व।१२।७ / ३४ भक्त्वाएकखंडंस्वीकृत्यांतरस्थितौदेयपक्षेचरमांतरस्थि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रमेस्थितिबंधः प्राक्तनसंख्यातवर्षसहस्रप्रमाणक्रमेणहीयमानः किंचिन्न्यूनवर्षमात्रोजातः चरमसमयबादरसांपर
यस्यमोहनीयस्थितिसत्वमंतर्मुहूर्त्तमात्रं घातित्रयस्यस्थितिसत्वंसंख्यातवर्षसहस्रमात्रंनामगोत्रवेदनीयानांस्थि
तिसत्वमसंख्यातवर्षमात्रंअनिवृत्तिकरणस्वरूपनिरूपकसूत्रं एकसमयेनाथाव्वविधसंज्वलनबादरकृष्टीनिर्मू
लमुन्मूल्यानंतरसमयेऽयंमुनिः प्रथमसमयसूक्ष्मसांपरायोजातः सूक्ष्मकृष्टीरपकृष्यवेदयमानः सूक्ष्मसांपराया
गुणस्थानंप्राप्तः इतितात्पर्यं सूक्ष्मसांपरायप्रथमसमयेलोभसंज्वलनप्रतिबद्धसूक्ष्मकृष्टीनांयाः स्थितयोंतर्मुहू
र्त्तप्रमाणास्तत्संख्यातैकभागमात्रस्थितिकांडकंलोभितंजातंमोहकृष्टिगतानुभागानुसमयापवर्त्तनंज्ञानावरणा
दिकर्मणांस्थित्यनुभागघातश्चप्राग्वत्प्रवर्त्तते तत्रद्रव्यनिक्षेपक्रमः कथमितिचेत्सूक्ष्मकृष्टिप्रतिबद्धानां स्थितां
नां स्थितस्थितिस्थितादेतावन्मात्रस १२ द्रव्यादेतावत् स १२ द्रव्यमपकृष्यदं पल्यासंख्यातेनभक्त्वाबहुखंडानिपृ
थक्संस्थाप्यैकखंडमेतावन्मात्रं स १२ पदमितगुणहति गुणितप्रभवेदः स्याद्गुणंतदाद्यूनं एकोनगुणवित्तकंगु
णसंकलितंविजानीयादित्येत सूत्रेद्ध्याएकादिपल्यासंख्यातैकभागमात्रगुणोत्तरनिजगुणश्रेण्यायामगच्छ
गुणसंकलनामानीयतयाभक्त्वाएकभागमात्रद्रव्यमुदयनिषेकेददातितत्राग्रतननिषेकेष्वुदयद्रव्यस्यःस्तोकांत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC-0. In Public Domain. Digitized by Sarayu Trust Foundation

पनात्तितियावत्प्रथमसमयकृतगुणश्रेणिशीर्षस्योपरितनानंतरस्थितिस्तावत्तावत्कृतः मोहनीयस्यावस्थित
गुणश्रेणिनिरूपात्तगुणश्रेणिशीर्षस्योपरितनानंतरैकस्थितौ गुणश्रेणिविषयत्वाभावेपि द्रव्यमाहात्म्याद
संख्यातगुणत्वेन ददाति तत उपरि स्तूतपूर्वकषायविषयीकृतां तस्य चरमस्थितिपर्यंतं विशेषहीनत्वेन ददा
ति तत उपरि द्वितीयस्थितेरादिस्थितौ प्राक्संख्यातगुणहीनतया ददाति तत उपरि विशेषहीनतया निक्षिप १
ति यावदतिस्थापनावलिं प्राप्नोति तावत् तृतीयादिसमयेषु अपकृष्टद्रव्यस्य दीयमानश्रेणिनिरूपणमनेन
क्रमेण कर्यते यावत् सूक्ष्मसांपरायस्य प्रथमस्थितिकांडकमुत्कीर्यमाणमुत्कीर्णं न भवति तावत् अत्र चरमफालिद्र
व्यप्रमाणनिरूपणं क्रियते तद्यथा। द्वितीयस्थितेः प्रथमगोपुच्छद्रव्यात् चरमफालेश्चरमगोपुच्छद्रव्यं रूपोननिजगच्छ
मात्रविशेषहीनं भवति तस्य प्रमाणमिदं [सं२२ / २८।४।२] चरमफालिद्रव्येण संगुणप विशेषाधिकं कृतं सत् चरमफालेः सर्वद्रव्य
प्रमाणमेतावत् [सं२२।७।४।४ / २१।४।२०] अत्र चरमफालिद्रव्यप्रमाणसमानगुणकारभागहारान् अपवर्त्य तावत् [सं२२।४ / २०]
इदं द्रव्यमपकृष्टद्रव्येणाधिकं कृत्वा संख्यापल्यासंख्यातभागेन भक्त्वा एकभागं स्वीकृत्य उदयनिषे
कादारभ्य गुणश्रेणिशीर्षपर्यंतमसंख्यातगुणितक्रमेण दत्वा शेषबहुभागं अंतरायामेन मध्यमं चरमफालिद्रव्यसं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रव्यंतदनंतरस्थितेःप्रभृतिविशेषहीनस्वरूपेणनिक्षिपनाछतियावस्थातिछापनावलिंप्राप्नोतितावत्‌द्विती
यकांडकप्रथमसमयापकृष्टद्रव्यनिरूपसंदृष्टिः

इतउपरिसूक्ष्मसांपरायस्यसर्वस्थितिकांडकेषपिदी
यमानप्रदेशश्रेणिक्रमः एवमस्तीतिज्ञातव्यः॥त्या वन्मोहनीयचरमस्थितिकांडकस्यचरमफालिःपत
तितावत्‌सर्वस्थितिकांडकेषुचरमफालिपातपर्यंत मपकृष्यमाणद्रव्यंसकलद्रव्यासंख्यातैकभागमात्रमेकस्य १
तुचरमफालिपातकालेस्थितिकांडकावावातद्रव्यंसकलद्रव्यसंख्यातैकभागएवत्तवेदितिसीक्रियते एवंसूक्ष्म
सांपरायप्रथमसमयादारभ्यदीयमानद्रव्यश्रेणिनिरूपणंसमाप्तं॥ ॥अथप्रथमसमयसूक्ष्मसांपरायस्यलोभस्य
निषेकेषुयःप्रदेशसमूहःदृश्यमानोस्थितस्यश्रेणिनिरूपणंक्रियतेतद्यथाप्रथमसमयसूक्ष्मसांपरायस्योद
यस्थितौदृश्यमानप्रदेशसमूहःस्तोकःद्वितीयस्थितौदृश्यमानोऽसंख्यातगुणःततउपरिगुणश्रेणिशीर्षस्यानंतरे
कनिषेकपर्यंतमसंख्यातगुणःकुतःअस्मिन्नवलेदीयमानद्रव्यवद्दृश्यमानद्रव्यस्यापिअसंख्यातगुणश्रेणिरूपेण १
वस्थानात्‌ततउपरिविशेषहीनतयादृश्यमानमस्तियावच्चरमांतरस्थितिस्तावत्‌कुतःदीयमानप्रदेशानुसारेण ८२
वद्दृश्यमानप्रदेशस्यापिविशेषहानिस्वरूपेणावस्थानात्‌चरमांतरस्थितेर्दृश्यमानाद्द्वितीयस्थितेरादिस्थितौदृश्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ख्यातरूपेणैकैकखंडमेतावत् स२।२ पूर्वमंतरस्थितौ दत्तद्रव्येण हीनं कृत्वा स्वीकृत्य पुनः शेषद्रव्यमेतावत् स२।२।२
प्राग्गृहीतद्रव्येण समच्छेदं कृत्वा २० मिलिते एतावत् स२।२।२०। इदं द्रव्यमंतरस्थिति प्राग्वत् षोडशाकारेण द २०
त्वा शेषद्रव्यमेतावत् स२।२।३।२।१६ शेषे द्वितीयस्थितौ गो २०।१७ षोडशाकारेण दत्ते चरमांतरस्थितौ दत्ते तावन्[illegible]
स२।२।१० ध्याद्द्वितीयस्थि २०।१७ तेरादिस्थितौ दत्ते तावन्मात्रद्रव्यमसंख्यातगुणहीनमस्ति ततः कारणाद्द्वितीयसमया
२०।४।२।१०।२७ दारभ्य सूक्ष्मसांपरायस्य प्रथमस्थितिकांडकचरमफालिपातपर्यंतमपकृष्य देयद्रव्यस्य दीयमानश्रे
णिक्रमः प्रथमसमयवदिति समर्पणं सूक्ष्मं जातं अत्रांतरपूरणेन गुणश्रेणिं विना शेषसर्वस्थितिष्वपि एक गोपुच्छा जा
तः इति ज्ञातव्यः द्वितीयस्थितिकांडके द्रव्यनिक्षेपक्रमः कथमस्तीति चेत् द्वितीयस्थितिकांडकात्तद्रव्यस्तनोदयावल्यु
परितनसर्वस्थितिस्पर्धकप्रदेशसमूहमपकृष्य पल्यासंख्यातेन भक्त्वा तत्रैकखंडं स्वीकृत्य प्राग्वदुदयनिषेके स्तोकं द
दाति ततउपरि असंख्यातगुणश्रेणिरूपेण ददाति यावद्गुणश्रेणिशीर्षस्योपरितनानंतरैकस्थितिस्तावत् शेषबहु
भागमात्रद्रव्यमुपरितनांतमुक्तत्वप्रमाणायामेन भक्त्वा तत्रैकखंडं रूपोनगच्छार्धमात्रविशेषाधिकं कृत्वा स्वीकृत्य
गुणश्रेणिशीर्षस्योपरितनानंतरस्थितौ दत्तं स तद्गुणश्रेणिशीर्षप्राग्वद्दत्तद्रव्यात् संप्रति दत्तद्रव्यमसंख्यातगुणं शेष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णं ततः प्रथमसमयसूक्ष्मसांपरायस्य मोहनीयस्थितिसत्त्वं संख्यातगुणं। अत्र गुणकारः प्रमाणं तत्प्रायोग्यसंख्यातरूपा
णि। इदमल्पबहुत्वं प्रकृतार्थसाधकं कथं जातमिति चेत् यतः कारणादस्मिन्नल्पबहुत्वे अंतरायामात् प्रथमस्थितिकांड
कायामः संख्यातगुण इत्युक्तः। ततः कारणात् प्रथमस्थितिकांडकस्य चरमफालिद्रव्यं अंतरायाममात्रगोपुच्छात् अंतरस्थिति
षु दत्त्वा द्वितीयस्थितौ सदृशैकगोपुच्छं कर्तुं द्रव्यमस्तीत्यस्य व्यापकतेयं प्रकृतार्थसाधकं प्रथमस्थितिकांडकायामात् अं
तरायामस्य मंदत्वं अंतरस्थितिद्वितीयस्थित्योरेकगोपुच्छाघटनात् द्वितीयादिस्थितिकांडकेष्वपि द्रव्यमानश्रेणिनिरूप
णमनेन क्रमेण कर्तव्यं। तत्रायं तु विशेषः गुणश्रेणिशीर्षं द्रव्यमानद्रव्यं विशेषाधिकमेव नासंख्यातगुणं। अस्य कारणं द
र्शनमोहनीयक्षपणायां सम्यक्त्वस्याष्टवर्षात्परं यथा उक्तं तथैव ज्ञातव्यं। इति द्रव्यमानद्रव्यश्रेणिनिरूपणं समाप्तं।
इत उपरि संक्षेपरुचिशिष्यानुग्रहनिमित्तं बादरकृष्टिप्रतिबद्धार्थनिरूपणं विस्तरं विना सूक्ष्मसांपरायप्रतिबद्धा
र्थनिरूपणं क्रियते॥ लो॥ द्वितीयसंग्रहकृष्टिवेदकस्य प्रथमस्थितौ विश्रमणावलिः संक्रमणावलिः उच्छिष्टावलिश्चेत्या
वलित्रयं यावदवशिष्यते तावदेव॥ लो॥ द्वितीयसंग्रहकृष्टिप्रदेशसमूहं गृह्णाति॥ लो॥ तृतीयसंग्रहकृष्टौ ददाति नत
त उपरि कुत्र ददाति इति चेत् सर्वद्रव्यं सूक्ष्मसांपरायकृष्टिषु ददाति। प्रथमस्थित्यावलित्रयं तावदवशिष्यते इति चेत् ८२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानोऽसंख्यातगुणः ततउपरि स्थिरमस्थितिपर्यंतं विशेषहीनतया दृश्यमानोस्ति द्वितीयसमयात्प्रवृत्तियावत्सूक्ष्म
सांपरायस्यप्रथमस्थितिकांडकंचरमसमयाविनाशितं तावत् दृश्यमानश्रेणिप्ररूपणास्यक्रमोयमेवाप्रथमस्थिति
कांडकस्यचरमफालिपतनानंतरं दृश्यमानद्रव्यस्यश्रेणिनिरूपणाक्रमः कथमस्तीतिचेत्प्रथमस्थितिकांडकविना
शात्परमुदयस्थितौप्रदेशासमूहस्तोकतयादृश्यमानोभवति द्वितीयस्थितावसंख्यातगुणतयादृश्यमानः ततउपरिगु
णश्रेणिशीर्षस्यानंतरैकस्थितिर्यावत्तावत्पर्यंतमसंख्यातगुणत्वेनदृश्यमानोस्ति ततउपरि विशेषहीनतयादृश्यमाने १
स्तिमोहनीयस्योत्कृष्टस्थितिस्तावत्कृतः प्रथमस्थितिकांडकस्यचरमफालिपातकाले गुणश्रेणिं विनाउपरितनाशेषस्थि
तौ आकृष्य एकगोपुच्छाकारेण निक्षिप्तदीयमानद्रव्यानुसारेण वदृश्यमानद्रव्यस्याप्यवस्थानात् सूक्ष्मसांपरायस्यप्रथम
स्थितिकांडकं प्रथमसमयविनाशितं जातं तदा गुणश्रेणिं विनाशेषस्थितिषु एकगोपुच्छश्रेणिः कथं जाता इति प्रश्रेत
न्निर्णयं कर्तुमिमान्स्वल्पतरान्वक्ष्यमाणपदान्प्रकुर्वंतिः तद्यथा अंतर्मुहूर्त्तप्रमाणः सूक्ष्मसांपरायकालः सर्वतः स्तोकः ततः
प्रथमसमयसूक्ष्मसांपरायस्यमोहनीयप्रतिबद्धगुणश्रेणिनिक्षेपो विशेषाधिकः विशेषप्रमाणं सूक्ष्मसांपरायकालस्यसं
ख्यातैकभागमात्रं ततः अंतरस्थितायामः संख्यातगुणः ततः सूक्ष्मसांपरायस्यमोहनीयस्यप्रथमस्थितिकांडकं संख्यातगु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिकालभागः प्रक्षेप्याः सूक्ष्मसांपरायकृष्टयः तदाद्यास्तु पल्यासंख्यातभागगुणिताः अधस्तनप्रक्षेपशलाकासंदृष्टिः
त्रसकलसूक्ष्मकृष्टिसंदृष्टिः ।७२। उपरितनप्रक्षेपशलाकाभिर्गुणितं सत् उपरितनानुदयकृष्टिप्रमाणं नवतिसं
दृष्टिः ।९०। सूक्ष्मसांपरायस्य ख२५ कालियावत्संख्यातबहुभागागच्छति तावत्संख्यातसहस्रस्थितिकांडकेषु पतितेषु
प्रथमो ख२५ हनीयस्यावरमस्थितिकांडकं पातयन् शेषसूक्ष्मसांपरायस्य कालं तत्काले शेषोपरितनमोहनीयस्थिता
ज्ञाताः स्वकीयकालाद्विशेषाधिकतया प्रथमसमयसूक्ष्मसांपरायेण निक्षिप्तगुणश्रेणिनिक्षेपे सूक्ष्मसांपरायेण नि
क्षिप्तगुणश्रेणिनिक्षेपे सूक्ष्मसांपरायस्यावशिष्टकालमात्रगुणश्रेणिगोपुच्छान् तत्काले शेषविशेषाधिकनिक्षेपप्रमाणगु
णश्रेणिगोपुच्छान् उपरितनगुणश्रेणिगोपुच्छान् तत उपरि गुणशीर्षात् संख्यातगुणान्तर्मुहूर्तमात्रगोपुच्छान् चरमस्थि
तिकांडकस्वरूपेण लांछतीत्यभिप्रायः ॥ चरमस्थितिकांडकस्य प्रथमसमये उत्कीर्यमाणद्रव्यस्य तदुपरिश्रेणिनिरूप
णं क्रियते तद्यथा ॥ तस्मिन् समये प्रथमफालिद्रव्यमपकृष्य पल्यासंख्यातभागेन भक्त्वा बहुखंडानि पृथक्संस्थाप्य शेषैक
खंडं पुनरपि पल्यासंख्यातभागेन भक्त्वा बहुखंडं पृथक्संस्थाप्य शेषैकखंडं पृथक्संस्थाप्यते तेषु प्रथमबहुखंडं पूर्व
क्तगुणसंकलितसूत्रोक्तेन गुणकारशलाकासंयोगेन भक्त्वा स्वस्वगुणकारशलाकाभिः संगुणितं तदुदयनिषेके प्रदेयं । ८४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लोभद्वितीयसंग्रहकृष्टितस्तृतीयबादरसांपरायकृष्टौ संक्रांतद्रव्यं तत्रैव विश्रमणावलिमात्रकालमवलस्वरूपेण स्थि
त्वा पश्चात्संक्रमणप्रायोग्यं भूत्वा संक्रमणावलिमात्रकालेन तद्द्रव्यं सर्वं त्वराणसत्वेन सद्दसूक्ष्मकृष्टिषु संक्रामति। ए
वं संक्रमणे सति तच्छिष्टावशेषं पश्चात्संक्रमणप्रायोग्यं भूत्वा संक्रमणावलिमात्रकालेन तद्द्रव्यं सर्वं त्वराणसत्वेन सद्दसूक्ष्म
कृष्टिषु संक्रामति। एवं संक्रमणे सति तच्छिष्टावलिमात्रप्रथमस्थितिरवशिष्यते तत्कारणात् लोभद्वितीयसंग्रहकृष्टे
:प्रथमस्थितावावलित्रयमवशिष्टे तावल्लोभद्वितीयसंग्रहकृष्टेर्द्रव्यं तृतीयबादरकृष्टौ संक्रामति ततउपरि न
संक्रामतीति निरूपणं युक्तियुक्तं। इत उपरि सूक्ष्मकृष्टिषु द्वितीयसंग्रहकृष्टिद्रव्यमपकर्षणसंक्रमणेन निक्षिपा
त्यष्टति यावत् निजप्रथमस्थितेरावलिप्रत्यावलिमात्रमवशिष्यते तावत् तत्रागालप्रत्यागालव्युच्छित्तिं कृत्वा द्विनः
समयोनावलिमात्रनिषेकान् तत्रत्यधोगणनया अनुभूय समयाधिकावलिमात्रप्रथमस्थितौ वर्त्तमानश्चरमसमयबादरसां
परायो भवति। तदनंतरसमये प्रथमसमयसूक्ष्मसांपरायो जातः। तदाऽधस्तनोपरिपल्यासंख्यातैकभागमात्रसूक्ष्मकृष्टी
र्मुक्त्वा मध्यमसूक्ष्मकृष्टयोऽसंख्यातबहुभागाः उदयंति। अधुनाऽनुदीर्णकृष्टीनामुदीर्णकृष्टीनां चाल्पबहुत्वमुच्यते
अधस्तनानुदीर्णकृष्टयः स्तोकाः। उपरितनानुदीर्णकृष्टयो विशेषाधिकाः। अधिकागमननिमित्तं भागहारः पल्यासंख्य १

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षपणासार ० ङ्किपल्योदयस्थितौप्रदेशसमूहंस्तोकंददाति।द्वितीयस्थितावसंख्यातगुणंददातिततःपरिअसंख्यातगु
८५ णक्रमेणददातियावत्सूक्ष्मसांपरायस्यद्विचरमसमयस्तावत्चरमसमयेशेषासंख्यातबहुभागमात्रंददा १ ६४
ति।द्विचरमसमयेदत्तद्रव्यात्पल्यस्यासंख्यातप्रथमवर्गमूलमात्रगुणकारेणगुणितंभवति।चरमफालिद्रव्य
निरूपसंदृष्टिः तच्चरमस्थितिकांडकपतनानंतरंमोहनीयस्यस्थितिकांडकघाताभावःशेषकर्मणांस्थिति
कांडकघातोस्ति तदास्थितिसत्वप्रमाणंकियदितिचेत्।सूक्ष्मसांपरायस्यकालोयावांस्तावन्मात्रमेवमोह
नीयस्यस्थितिसत्वमवशिष्यते।अत्रश्रेण्यारूढाःषोडशविधाः।तद्यथा।पुरुषवेदक्रोधोदयारूढः।पुरुषवेदमा
नोदयारूढः।पुरुषवेदलोभोदयारूढः।स्त्रीवेदक्रोधोदयारूढः।स्त्रीवेदमानोदयारूढः।स्त्रीवेदमायोदयारू
ढः।स्त्रीवेदलोभोदयारूढः।नपुंसकवेदक्रोधोदयारूढः।नपुंसकवेदमानोदयारूढः।नपुंसकवेदमायोदयारू
ढः।नपुंसकवेदलोभोदयारूढश्चेति।तेषुएकंप्रतिरूपणाविधानमुक्तमितिचेत्।सूक्ष्मसांपरायपर्यंताद्यमनं
तरोक्तसकलक्षपणप्ररूपणा।पुरुषवेदोदयविशिष्टोमूचाक्रोधोदयेनक्षपकश्रेण्यारूढस्तत्क्षपकंप्रतीत्य ८५
क्ता।इदानींपुरुषवेदोदयविशिष्टमानोदयेनक्षपकश्रेणिमारूढस्यप्ररूपणाऽवबध्यते।तद्यथा।अधःप्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कस्य यदा स्यात् संग्रहकृष्टयो न भवंति मानोदयक्षपकस्य नैव संग्रहकृष्टयो भवंति। अयं तृतीयो भेदः। क्रोधोदयेन क्षप-
कश्रेण्यारूढस्य यत्र चतुःसंज्वलनकृष्टिकरणं तत्र मानोदयेन क्षपकश्रेण्यारूढस्य संज्वलनत्रयस्याश्वकर्ण-
करणमपवर्तितं। अयं चतुर्थो भेदः। क्रोधोदयेन क्षपकश्रेणिमारूढस्य यत्र क्रोधसंग्रहकृष्टिक्षपणं तत्र मानोद-
येन क्षपकश्रेण्यारूढस्य मानादिसंज्वलनत्रयस्य कृष्टिकारकत्वं न भवति। अयं पंचमो भेदः। क्रोधोदयेन क्षपकश्रे-
ण्यारूढस्य यत्र मानसंज्वलनसंग्रहत्रयक्षपणं तत्र मानोदयेन क्षपकश्रेण्यारूढस्य मानसंग्रहकृष्टिक्षपणं
न भवति। अत्रानयोः किमपि भेदो नास्तीत्यभिप्रायः। इत उपरि यथा क्रोधोदयेन क्षपकश्रेण्यारूढस्य क्षपणविधान-
मुक्तं तथैव मानोदयेन क्षपकश्रेण्यारूढस्यापि वक्तव्यं। मायासंग्रहकृष्टिक्षपणं प्रभृति सूक्ष्मसांपरायपर्यंतक्रि-
याप्ररूपणा एवं ध्रुवक्षपकानां यस्य किमपि भेदो नास्तीति तात्पर्यं। अथ च रूपवेदोदयविशिष्टमायोदयेन क्षपकश्रे-
ण्यारूढस्य प्ररूपणा लेशः कथ्यते। तद्यथा। अत्राधःप्रवृत्तिकरणादारभ्यांतरकरणपर्यंतं प्रथमतृतीयक्षपकयोः कि-
मपि भेदो नास्ति। अंतरकरणानंतरं भेदोस्ति स कथ्यते। क्रोधोदयक्षपकश्रेण्यारूढस्य कृष्टिकरणकालपर्यंतं क्रोधप्र- ८६
थमस्थितिः क्रोधसंग्रहकृष्टित्रयक्षपणकालो मानसंग्रहकृष्टित्रयक्षपणकालः सहितः सन् मायोदयक्षपकश्रेण्यारूढस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समूहंस्तोकंददातितदनंतरनिषेकेऽसंख्यातगुणंददाति एवमसंख्यातगुणश्रेणिरूपेण निक्षिपन्गच्छतियावत्सूक्ष्मसां
परायचरमसमयस्तावत् इदमेवेदानींतगुणश्रेणिशीर्षमिति अत्र प्रथमपर्वप्रतिबद्धद्रव्यंसमाप्तं ॥ पुनर्द्वितीयवकांड
द्रव्यंपदाप्रमखिलंधनंगमनिकाततोवर्त्ततइतिसूत्रेणनिक्षिपन् तदनंतरनिषेकेगुणश्रेणिशीर्षेदत्तद्रव्यादसंख्या
तगुणहीनंददाति ततउपरिविशेषहीनंनिक्षिपनाच्छति यावत्पुराणगुणश्रेणिशीर्षंतावत् अत्रद्वितीयपर्वप्रतिबद्ध
द्रव्यंसमाप्तं ॥ पुनरवशिष्टैकखंडद्रव्यमनेनसूत्रेणनिक्षिपेत् तदुपरितनस्थितेःपुराणगुणश्रेणिशीर्षेदत्तद्रव्याद
संख्यातगुणहीनंददाति ततउपरिसर्वेष्वपिनिषेकेषु विशेकेषु विशेषहीनंददातियावस्त्वकीयचरमस्थितिमतिस्था
पनावलिमात्रेणप्राप्नोतितावत् चरमनिषेकादारभ्यावलिमात्रनिषेकान्मुक्त्वाशेषनिषेकेषु द्रव्यंददाति तदर्थः अत्र
तृतीयपर्वप्रतिबद्धद्रव्यंसमाप्तं ॥ चरमकांडकप्रथमसमयापकृष्टद्रव्यनिक्षेपसंदृष्टिः चरमस्थितिकांडकस्यद्विती
यादिफालिपतनेऽनेनक्रमेणदीयमानद्रव्यश्रेणिनिरूपणंकुर्यात् यावद्द्विचरमफालि द्रव्यंपततितावत् पुनःकिं
चिन्न्यूनद्व्यर्द्धगुणहानिमात्रसमयप्रबद्धप्रमाणंचरमफालिद्रव्यंपल्यासंख्यातप्रथम वर्गमूलप्रमाणेनपल्यासं
ख्यातभागेनखंडकाएकखंडंगुणकारशलाकासंकलनेनखंडकाश्चस्वस्वगुणकारशलाकाभिःसंगुण्यगुणश्रेण्यायामेनि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्रस्थानिक्षपकोनयस्यक्षपणाव्यापारव्यपरीत्यंनास्तीतितात्पर्यं॥इतउपरिलोभवादरसूक्ष्मकृष्टिविनाशाकस्यकिमपि
भेदोनास्ति॥अथपुरुषवेदोदयविशिष्टसंज्वलनलोभोदयेनक्षपकश्रेण्यारूढस्यक्षपणाविधानभेदउच्यते॥अत्राप्यधः
प्रवृत्तकरणाद्या[illegible]तरकरणपर्यंतंकिमपिभेदोनास्ति॥अंतरकरणादुपरिलोभसंज्वलनस्यांतर्मुहूर्तमात्रंप्रथमस्थि
तिंकरोति॥प्रथमक्षपकःक्रोधसंज्वलनस्यांतर्मुहूर्तमात्रप्रथमस्थितिंकरोति॥अयंचतुर्थक्षपकःक्रोधप्रथमस्थितिकर
णांतरेणलोभसंज्वलनस्यप्रथमस्थितिमंतर्मुहूर्तप्रमितांकरोति॥अयमनयोःप्रथमभेदः॥साप्रथमस्थितिःकियतीति
चेत्क्रोधोदयेनक्षपकश्रेण्यारूढस्यकृष्टिकरणकालपर्यंतक्रोधप्रथमस्थितिःक्रोधमानमायाक्षपणाकालसहितासती
लोभोदयेनक्षपकश्रेण्यारूढस्यलोभप्रथमस्थितिर्भवति॥क्रोधोदयक्षपकःक्रोधस्यांतरकरणकालेकृष्टिकरणाद्याप
र्यंतंप्रथमस्थितिंसंस्थाप्यांतरकरणंकृत्वापश्चात्क्रमेणक्रोधमानमायासंबंधिसंग्रहवकस्यनववारंप्रथमस्थितिंकरो
ति॥लोभोदयक्षपकःअंतरकरणकालएवलोभस्यतावतीप्रथमस्थितिंयुगपदेवकरोतीतितात्पर्यं॥अयंद्वितीयोभे
दः॥तावन्मात्रप्रथमस्थितौक्रियमाणकार्यभेदनिर्णयःइतउपरिक्रियते॥क्रोधोदयेनक्षपकश्रेण्यारूढःयत्रोद्देशेऽव
श्वसंज्वलनानामश्वकर्णकरणंकरोतितत्रोद्देशेलोभोदयेनक्षपकश्रेण्यारूढःसंज्वलनक्रोधंपूर्वस्पर्धकरूपेणनाशाय ८७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिक्रोधोदयेनक्षपकश्रेण्यारूढोयत्रस्थानेसंज्वलनचतुष्टयस्यकृष्टीःकरोतितस्मिन्कालेलोभोदयेनक्षपकश्रेण्यारूढः
संज्वलनमानंपूर्वस्पर्धकरूपेणनाशयतिक्रोधोदयेनक्षपकश्रेण्यारूढःयत्रस्थलेक्रोधसंज्वलनसंग्रहत्रयं[illegible]
तितस्मिन्स्थानेलोभोदयेनक्षपकश्रेण्यारूढःसंज्वलनमायांपूर्वस्पर्धकरूपेणक्षपयति कारणंलोभोदयक्षप
कस्यतिष्ठ एवसंग्रहकृष्टयोभवतिक्रोधोदयेनक्षपकश्रेण्यारूढःयत्रप्रणियोमानसंज्वलनसंग्रहत्रयंनिर्मूलयति
तस्मिन्खंडेलोभोदयेनक्षपकश्रेण्यारूढःलोभसंज्वलनस्यापूर्वकर्णकरणंकरोति अत्रलोभसंज्वलनस्यापूर्वकर्णका
रणानुभागस्यमायाअघटनादनुभागविशेषघातःअपूर्वस्पर्धकविधानंवापूर्वापूर्वकर्णकरणकालघटनायक्रमात्क्रो
धोदयेनक्षपकश्रेण्यारूढःयत्रपदेमायासंज्वलनसंग्रहत्रयमुन्मूलयतितत्रस्थलेलोभोदयेनक्षपकश्रेण्यारूढःलोभसं
ज्वलनस्यपूर्वापूर्वस्पर्धकद्वयंगृहीत्वाबादरसंग्रहकृष्टित्रयंकरोतिक्रोधोदयेनक्षपकश्रेण्यारूढःयत्रस्थानेलोभसंज्व
लनसंग्रहत्रयंनिर्मूलयतितस्मिन्स्थलेलोभोदयेनक्षपकश्रेण्यारूढःलोभसंज्वलनसंग्रहत्रयंक्षपयति अत्रस्थलेन
याःकिमपिविशेषोनास्तीत्यभिप्रायःअयंसर्वःसन्निकर्षणसमुत्पन्नप्ररूपणाभेदःपुरुषवेदोदयेनक्षपकश्रेण्यारूढमानमा
यालोभोदयक्षपकस्यसूक्ष्मस्त्रीनपुंसकवेदक्रोधोदयक्षपकमाश्रित्योक्तःतक्रोधोपयोगिगणसंदृष्टिः इतउपरिस्त्रीवेदोदये

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नक्षपकस्य क्षपणाभेदउच्यते।।आधःप्रवृत्तकरणादारभ्य यावदंतकरणं न करोति तावत्क्षपणाभेदो नास्ति अंतरकरणं

लोभ=क्षु=क्ष	लो=२क्षपण	लो=न=३ क्ष	लो३नक्षपण
या=क्षु=२क्षप	या=२क्षपण	या=२क्षपण	कृष्टिकरण
मा=क्षु२क्षप	मा२क्षक्षप	कृष्टिकरण	अपूर्वकर्णकरण
कृष्टि२क्षप	कृष्टिकरण	अपूर्वकर्णकरण	या=२क्षपण
कृष्टिकरण	अपूर्वकर्णकि	मान=क्षु२क्षप	मा=२क्षपण
अपूर्वकर्ण	क्रोध=२क्षप	क्रोधक्षु=२क्षप	क्रो=२क्षपण
नोकषाय७क्ष	नोक=७क्षप	नोक७क्षप	नोक७क्षपण
पुं=क्रोधोदय	पुंवेदमानोदय	पुं=मायोदय	पुंवेदलोभोद

कृत्वेनपुंस्त्रीवेदस्यप्रथमस्थितिंकरोतिप्रथमस्थितिंकरोतिअयंक्षपक
तस्यप्रथमस्थितिमकृत्वास्त्रीवेदस्यैवप्रथमस्थितिंकरोतीत्ययंभेदः
कुतः।यस्यवेदस्ययस्यसंज्वलनस्यवोदयेनक्षपकश्रेणिमारूढस्तयो
रेवप्रथमस्थितिमंतर्मुहूर्तप्रमितांस्थापयतीतिनियमात्।साप्रथम
स्थितिःकियतीतिचेत्।पुरुषवेदेनक्षपकश्रेण्यारूढक्षपकस्यनपुंस
कवेदक्षपणाद्धासहितस्त्रीवेदक्षपणाद्धायावतीस्त्रीवेदोदयेनक्षपकश्रे
ण्यारूढक्षपकस्यस्त्रीवेदप्रथमस्थितिस्तावतीस्यात्।नपुंसकवेदंक्षपयतोस्यक्षपकस्यपुरुषवेदक्षपकात्कोपिभेदो
नास्तिनपुंसकवेदक्षपणानंतरंस्त्रीवेदंक्षपयति।स्त्रीवेदक्षपणाद्धायाःप्रमाणंकियदितिचेत्पुरुषवेदेनक्षपकश्रे ८८
ण्यारूढक्षपकस्यस्त्रीवेदक्षपणाद्धायावतीस्त्रीवेदेनक्षपकश्रेण्यारूढक्षपकस्यापिस्त्रीवेदक्षपणाद्धातावत्येवापुरु ८९
षवेदोदयक्षपकस्यस्त्रीवेदक्षपणाद्धातःस्त्रीवेदोदयक्षपकस्यस्त्रीवेदक्षपणाद्धायाःप्रमाणेनप्रणिधिनाकोभेदोनास्ति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मायाप्रथमस्थितिप्रमाणंअनुवर्तितक्रोधोदयक्षपकः क्रोधस्यांतरकरणकालेकृष्टिकरणाद्यापर्यंतंप्रथमस्थितिंसंस्थाप्यां २
तरकरणंकृत्वापश्चात्क्रमेणक्रोधमानसंबंधिसंग्रहकृष्टिस्पर्धकप्रथमस्थितिंकरोतिमायोदयक्षपकःअंतरकर
णकालेएवमायायाःतावतींप्रथमस्थितिंयुगपदेवकरोतीत्यभिप्रायःएवंतावन्मात्रप्रथमस्थितौक्रियमाणव्यापारवि
शेषविषयंक्रियतेक्रोधोदयेनक्षपकश्रेण्यारूढःयत्रोद्दिष्टसंज्वलनचतुष्टयस्याश्वकर्णक्रियांकरोतितत्रोद्देशेमायो
दयेनक्षपकःश्रेण्यारूढःसंज्वलनक्रोधंपूर्वस्पर्धकरूपेणविनाशयतिक्रोधोदयेनक्षपकश्रेण्यारूढःयत्रचतुःसंज्व
लनकृष्टिकरणाद्यातत्रकालेमायोदयेनक्षपकश्रेण्यारूढःसंज्वलनमानंपूर्वस्पर्धकरूपेणनाशयतितत्कारणम्मा
योदयक्षपकस्यसंग्रहकृष्टयःषडेवअनुवर्तितक्रोधोदयेनक्षपकश्रेण्यारूढःयत्रप्रणिधौक्रोधसंज्वलनसंग्रहकृष्टित्र
यंनाशयतितत्रस्थलेमायोदयेनक्षपकश्रेण्यारूढःमायालोभसंज्वलनयोरपूर्वस्पर्धकविधानसहिताश्वकर्णकरणं
करोतिअयंचतुर्थोभेदः क्रोधोदयेनक्षपकश्रेण्यारूढःयत्रस्थानेमानसंज्वलनसंग्रहत्रयंनाशयतितत्रस्थानेमायो
दयेनक्षपकश्रेण्यारूढःमायालोभयोःवादरकृष्टीःकरोतिअयंपंचमोभेदः क्रोधोदयेनक्षपकश्रेण्यारूढःयत्रस्थानेमा
यासंज्वलनसंग्रहकृष्टित्रयंनाशयतितत्रस्थानेमायोदयेनक्षपकश्रेण्यारूढःमायासंज्वलनसंग्रहकृष्टित्रयंनाशयति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

करोतिइत्यमेकोदेशः साप्रथमस्थितिःकियतीतिचेत्स्त्रीवेदोदयेनक्षपकश्रेण्यारूढक्षपकस्यस्त्रीवेदप्रथमस्थि
तिःयावतीनपुंसकवेदोदयेनक्षपकश्रेण्यारूढक्षपकस्यापिनपुंसकवेदस्यप्रथमस्थितिस्तावत्येवभवतिएवंवि
धप्रथमस्थितौनपुंसकवेदस्त्रीवेदयोःक्षपणायाःप्रारंभःपरिसमाप्तिश्चयुगपत्क्रमेणवाइतिचेन्निर्णयःक्रियतेअंत
रचरमफालिपतनानंतरसमयात्प्रभृतिनपुंसकवेदक्षपणांप्रारभतेतत्क्षपणाध्धाप्रमाणंकियदितिचेत्पुरुषवे
दोदयेनक्षपकश्रेण्यारूढक्षपकस्यनपुंसकवेदक्षपणाध्धायाःयावत्प्रमाणमस्तिनपुंसकवेदोदयेनक्षपकश्रेण्या
रूढक्षपकस्यतावत्प्रमाणनपुंसकवेदक्षपणाध्धायेपिनपुंसकवेदोनक्षीयतेतदुपरितनसमयेस्त्रीवेदक्षपणांप्रा
रभतेतदंतमेवकिंक्षपयेतअन्यथानपुंसकवेदमपिक्षपयतिपुरुषवेदेनक्षपकश्रेण्यारूढक्षपकस्ययस्यामध्धायां
स्त्रीवेदोविनष्टःतस्यामेवाध्धायामेवंक्षयंक्षपयतिनपुंसकवेदोदयेनक्षपकश्रेण्यारूढक्षपकस्यसर्वस्त्रीवेदनपुंस
कवेदस्थयुगपत्स्त्रीवेदद्वराणासत्वक्षपणाकालचरमसमये द्वितीय
स्थितिस्थितपुरुषवेदस्योपरिसर्वसंक्रमेणसंक्रांततयानष्टद्रव्या
र्धिकनयोविद्यमानवस्कनोनाझंमन्पत्ततदसिप्रायेणचरमसमये

लो=क्ष=२ क्ष	लो=२ क्षप	लो=२ क्षप	लो=२ क्षप
या २ क्षप	या=२ क्षप	याः २ क्षप	कृष्टिकरण
मा=२ क्षप	मा=२ क्षप	कृष्टिकरण	अश्वकर्णक
कृष्टि क्षप	कृष्टिकरण	अश्वकर्ण	या=२ क्षप
कृष्टिकरण	अश्वकरण	मा=२ क्षप	मा=क्षप
अश्वकर्ण	क्रो=२ क्षप	क्रो=२ क्षप	क्रो=२ क्षप
नोक १ क्ष	नो=१ क्षप	नो=१ क्षप	नो=१ क्षप
स्त्रीवेदक्रो=	स्त्री=मानो	स्त्रीवे=या=	स्त्री=लोनो

८०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्त्रीवेदायास्त्रीवेदस्य प्रथमस्थितिः प्रक्षीणानंतरमपगतवेदोभूत्वा सप्तनोकषायान् क्षपयति पुरुषवेदोदयक्षपकः सवे
दः सन् षण्णोकषायान् पुरुषवेदं चिरंतनसत्वं च क्षपयति। अयं क्षपकः अपगतवेदोभूत्वा पुरुषवेदं षण्णोकषायान् क्ष
पयति इत्यनयोर्विशेषो ज्ञातव्यः सप्तनोकषायाणां क्षपणकालः समानो भवति। पुरुषवेदोदयक्षपकः सप्तनो
कषायक्षपणकालचरमे पुरुषवेदं चिरंतनसत्वेन सह षण्णोकषायान् क्षपयित्वा ततउपरि समयोनद्व्यावलिमात्रका
लगते पुरुषवेदनवकबंधसमयप्रबद्धान् नाशयति। अयं क्षपकः अपगतवेदावस्थायां पुरुषवेदस्य बंधाभावात् सप्त
नोकषायान् स्वकीयक्षपणाकालचरमे साकल्येन क्षपयति अयं भेदस्तृतीयः इत उपरि स्त्रीवेदोदयविशिष्टस्य
विधक्षपकस्याश्वकर्णकरणादिक्रिया एवं बंधस्य धाराभूते सूक्ष्मसांपरायपर्यंते कथिता वर्णिष्टपदे पुरुष
वेदोदयविशिष्टस्य विधक्षपकाद्विशेषोपि नास्ति पूर्वोक्तार्थप्रतिवद्धसंदृष्टिः २ इत उपरि नपुंसकवेदोदयेनक्ष
पकश्रेण्यारूढक्षपकस्य क्षपणाप्ररूपणा नानाविधमुच्यते अत्राप्यधःप्रवृत्तकरणादारभ्यांतरकरणं यावत् करोति ता
वत्स्वरूपणा भेदो नास्ति। अंतरकरणं कुर्वन् नपुंसकवेदस्य प्रथमस्थितिं स्थापयति प्रथमक्षपकः पुरुषवेदस्य प्रथमस्थि
तिं करोति अयं क्षपकः तस्य प्रथमस्थितिमात्रं नपुंसकवेदस्य प्रथमस्थितिं स्थापयति प्रथमक्षपकः पुरुषवेदस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

मा.ण.कृ.ष्णपाभाग.वर्षणाअवणोऽहं.परमागमपूर्वापरपरीक्षाद्क्षःशौहः सूक्ष्मोक्तिकया पूर्वपक्षमीदृक्षं करोति सम
समयवर्त्तिनः अनिवृत्तिकरणक्षपकपरिणामः समाना असमाना वा स
समानाश्चेत् क्षपणकार्यभेदो न संभवति समानकारणनिष्पाद्यत्वात् असमा
ना इति पक्षे एकसमये प्रियायेनाक्षादिभिरसदृशाः सदृशाश्च परिणामैः सदृशा
ः स्फः नियमाद भिवृत्तयस्ते नोइत्यागमो वाध्यते इत्यत्र परिहारमुच्यते द्वितीय
पक्षानरूपणमात्रात तत्पक्षनिक्षतक्षपणलेशस्याप्यप्रवेशः प्रथमपक्षप्रति
क्षपणासंलवो संभाम एव यथा विशिष्टशक्तियुक्तशाल्यादिवीजानि एकस्वरूपाण्यपि वक्तस्वभाववेदकषायादयसद
कारिकारणसामग्रीसन्निधानेन नानाविधक्षपणलक्षणकार्योत्पादकाः संवृत्ताः तत्र विरोधाभावात् क्षपणविधानमिदं प्रति
पादनं समंजसं। एवं सूक्ष्मसांपरायकालेसंख्यातिकभागे अवशिष्टे निजांतरंगसमुद्भूतदेदीप्यमानप्रथमशुक्लध्यानप्रचं
डाखंडमंडितमंडलाथ निशातधारा निपतितनलीलावष्टब्धविशिष्टपत्रयपक्षष्टावष्टंभविशिष्टमोहमहामहीपालकमस्तका
यमानलोभचरमकांडकपातं कृत्वा क्रमेणाधःस्थितिगलनेन तत्काला वशेषमात्रगुणश्रेणिगोपुच्छानां अनुसमयावेपेक्ष ९१

को=३क्षपण	लोभ=२क्षप	लोभ=२क्षप	लोभ=२क्षप
या=२क्षपण	या=२क्षप	मा=२क्षप	कृष्टिकरण
मा=२क्षप	मा=२क्षप	कृष्टिकर्म	अश्वकर्ण
कृष्टिक्षपण	कृष्टिकर्म	अश्वकर्ण	या=२क्षप
कृष्टिकरण	अश्वकर्ण	मा=२क्ष	मा=२क्षप
अश्वकर्ण	को=२क्षप	को=२क्ष	को=२क्षप
नो=क्षपण	नोक=७क्ष	नो=७क्षप	नो=७क्षप
नपुं=को	न=मानोदय	न=मा=	न=लोभ=

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्द्वयं नष्टमिति ज्ञातव्यं। पर्यायार्थिकनयेन अविद्यमानवस्तुनो नाशं वक्तीति तदनुमतत्वात् अग्रतनसमयेन नष्टमिति द्वितीये २
न्नेदः तदा प्रथमस्थितौ नपुंसकवेदस्योदयनिषेकः एकः एकोऽवशिष्यते स च तदनंतरसमयेन नश्यतीति तद्विनाशात् उपरि
अपगतवेदः सप्त नोकषायान् क्षपयति पुरुषवेदोदयक्षपकः सवेदः षण्णोकषायान् पुरुषवेदं चरम। सर्वं क्षप
यति। अयं क्षपकः अपगतवेदो भूत्वा पुरुषवेदं षण्णोकषायान् क्षपयति। अयं तावदतीतः सप्तनोकषायाणां क्षपणा यासमा
ना। पुरुषवेदोदयक्षपकः सप्तनोकषायक्षपणायाः चरमे पुरुषवेदं चरमाण सत्वेन सह षण्णोकषायान् क्षिपयित्वा तत्र
परिसमयोनद्व्यावलिमात्रे काले गते पश्चात् पुरुषवेदनवकबंधसमयप्रबद्धं नाशयति। अयं क्षपकः सवेदद्विचरमसमये
पुरुषवेदबंधव्युच्छित्तिर्भवतीति। अपगतवेदप्रथमसमयप्रभृति सप्तनोकषायक्षपणायां द्विसमयोनद्व्यावलिमात्रका
ले गते पुरुषवेदनवकबंधसमयप्रबद्धं विनाशयति। द्विचरमसमये सप्तनोकषायान् स्वसाकल्येन क्षपयति। अयं क्वचोधत्वे
दः। इतः परं नपुंसकवेदोदयविशिष्टचतुर्विधक्षपकाणां मध्ये कर्णकरणादिक्रियाप्रबंधस्याधारभूते सूक्ष्मसांपराय
पर्यंतं षडुकथितावशिष्टपदेषु पुरुषवेदोदयेन क्षपकश्रेण्यारूढस्य चतुर्विधक्षपकसमूहस्य प्ररूपणं यथाप्युक्तं तथैवावि
शेषाभावात्। अत्रोपयोगिनी संदृष्टिः। एवं द्वादशविधक्षपकानां क्षपणाप्ररूपणाभेदः प्रतिपादितः। अत्र मंदरमदीयस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नदर्शनावरणांतरायाणामंतर्मुहूर्तमात्रस्थितिकांडकघातितावशेषानुभागस्यानंतबहुभागमात्रमनुभागकां
डकं च लांछति नामगोत्रवेदनीयानां शेषस्थितिसत्वस्यासंख्यातबहुभागमात्रस्थितिकांडकं लांछितं एतत्कर्मसंबंध
डाशस्तप्रकृतीनां घातितावशेषानुभागस्यानंतबहुभागप्रमाणमनुभागकांडकं लांछितं तत्प्रथमसमये गुणश्रेणिनि
क्षेपः कथमस्तीतिचेत् षट्कर्मणां द्रव्यपिंडमपकर्षणोक्तक्रमेण निक्षिपन् उदयनिषेके स्तोकं ददाति द्वितीयनिषे
के ऽसंख्यातगुणं ददाति इत्यसंख्यातगुणश्रेणिं स्थापयति यावत्क्षीणकषायाद्धाया उपरि संख्यातैकभागमात्राद्धानम
तीत्य गुणश्रेणिशीर्षं तिष्ठति तावत् अनंतरं गुणश्रेणिशीर्षद्रव्यात् उपरितनानंतरस्थिताव संख्यातगुणं ददाति कुतः अ
पकृष्टद्रव्यं पल्यासंख्यातेन भक्त्वा एकखंडं गुणश्रेण्यां दत्वा शेषबहुखंडमात्रद्रव्यं गुणश्रेणिशीर्षस्योपरितनाद्धनास्व
पोनाद्धार्धहीनद्विगुणगुणहानिगुणितेन तत्स्थाद्विगुणहान्यासंगुणप्य निरुद्धनिषेके दीयमानतावन्मात्रद्रव्यस्य गुण
श्रेणिशीर्षद्रव्यादसंख्यातगुणत्वस्य निर्बाधं संसिद्धत्वात् तदुपरितनसर्वनिषेकेषु विशेषहीनं निक्षिपन् आगच्छति या
वच्चरमस्थितिमतिस्थापनावलिमात्रेण प्राप्नोति तावत् द्वितीयसमयेपि गुणश्रेणिशीर्षद्रव्यादसंख्यातगुणत्वस्य निर्बा ८२
धत्वेन संसिद्धत्वात् तदुपरितनसर्वनिषेकेषु विशेषहीनं निक्षिपन् गच्छति यावच्चरमस्थितिमतिस्थापनावलिमात्रेण प्रा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

×स्य स्थितिसत्वमंतर्मुहूर्तमात्रमक्षीणकषायस्य कालात्संख्यातगुणं नामगोत्रवेदनीयस्थितिसत्वमसंख्यातवर्षसंमितं मोहनीय× २२

मानसूक्ष्मकृष्टिरूपानुभागसंगता ॥ अनुनवहृयदा महामुनिराजश्चरमसमयसूक्ष्मसांपरायो जातस्तदा नामगोत्रसत्व
पश्चिमस्थितिबंधोऽष्टमुहूर्तमात्रः वेदनीयचरमबंधः द्वादशमुहूर्तप्रमितः घातित्रयस्यांतर्बंधोंतर्मुहूर्तप्रमाणः घातित्रयु
स्य स्थितिसत्वं कृष्ट्योन्मुखमस्तीति द्रव्यार्थिकनयाश्रयेनास्मिन्समये विद्यमानमपि विनिष्टमिति ज्ञातव्यं सूक्ष्मसांपरायस्व
रूपावभासकसूत्रं लोभस्य सूक्ष्मकृष्टीः कृष्ट्योन्मुखाः ध्यायति संवेदयति स्यात् सूक्ष्मसांपरायः एवमष्टचारित्रसमाप्तिमुखः ॥ अथ
कृष्टिवेदकाधिकारः समाप्तः ॥ इदानीं साक्षान्निर्ग्रंथवीतरागगुणस्थानस्वरूपं निरूप्यते ॥ चारित्रमोहनीयनिर्मूलकृत्यानंत
रसमये यं महात्मा क्षीणकषायगुणस्थानमाश्रयति ॥ स्फटिकभाजनावलेद निर्वाशेषकषायकलुषप्रक्षयेणायं मुमुक्षुः क्षीणकषा
य इत्यन्वर्थसंज्ञां लभमानो यथाख्यातशुद्धचारित्रं चूर्णकृत्यलक्ष्मीवल्लभो जातः इत्यर्थः तत्प्रथमसमये सर्वकर्मणां स्थित्यनु
भागं नवध्नाति कुतः तत्कारणकषायपरिणामस्य तद्व्ययव्यतिरेकानुविधायित्वात् तादृशकषायपरिणामसंक्लेशभावादेव स्य×
तिपंतः स्थित्यादिबंधसंभवो नास्तीति सूक्ष्मप्रकृतिप्रदेशबंधः योगमात्रनिबंधनत्वादत्र संभवति । तस्य प्रतिषेधो नास्ति सत्व
सातवेदनीयस्यैव शेषप्रकृतीनामत्र बंधाभावात् स ईर्यापथबंधः स्थित्यनुभागबंधकारणकषायसंयोगाभावात् शुष्ककु
ड्यपतितपांशुमुष्टिवद्बंधानंतरसमये निर्जीयते ॥ अधुना क्षीणकषायप्रथमसमये क्रियमाणव्यापारभेदः प्रतिपाद्यते ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

णं संज्वलनलोभचरमस्थितिकांडकोत्करकुर्यात्। एवं तच्चरमस्थितिकांडकप्रथमादिफालीन्निर्मूल्य पश्चात्तच्चरमस्थि
तिकांडकस्य किंचिन्न्यूनद्व्यर्धगुणहानिमात्रचरमफालिद्रव्यं स्वीकृत्य पूर्वोक्तक्रमेण निक्षिपन् उदयस्थितौ स्तोकं
ददाति द्वितीयस्थितावसंख्यातगुणं ददाति एवमसंख्यातगुणश्रेणिद्रव्यं निक्षिपन् क्षीणकषायचरमसमये द्वि
चरमसमये दत्तद्रव्यात्पल्यासंख्यातप्रथमवर्गमूलगुणितं ददाति। इतउपरि घातित्रयस्य स्थितिकांडकघातो
नास्ति केवलमुदयावलिबाह्यस्थितप्रदेशमपकृष्यासंख्यातगुणश्रेणिरूपेणोदीरणां करोति एवं घातित्रयस्यो
दीरको भवति यावत्समयाधिकावलिकाचरमक्षीणकषायस्तावत्। ततउपरि घातित्रयस्य क्रमोदय एव उदयावलि
प्रविष्टप्रदेशानां सत्त्वस्योदीरणाया अभावात्। इतउपरि क्षीणकषायस्य द्विचरमसमये निद्राप्रचलयोरुदयव्युच्छित्ति
श्च युगपदेकत्ववितर्कध्यानपरिणतिस्य क्षीणकषायस्य तद्ध्यानविरोधिनिद्राप्रचलोदयः कथं घटते इति नाशं
कनीयं ध्यानोपयुक्तेपि अव्यक्तउदयसंभवस्य विरोधाभावात्। ततउपरि क्षीणकषायस्य चरमसमये पंचज्ञाना
वरणीयचतुर्दर्शनावरणीयपंचांतरायाणां युगपदुदयव्युच्छित्तिः सत्त्वव्युच्छित्तिश्च भवतः। तदा घातिकर्मणां ९३
स्थितिप्रमाणं कियदिति चेत्। नामगोत्रवेदनीयानां स्थितिसत्त्वमसंख्यातवर्षप्रमाणं। पल्यासंख्यातभागमात्रमपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ष्टो। तितावत् द्वितीयसमयेपि गुणश्रेणिनिषेकक्रमः एवमेवायं तु विशेषः निक्षेपायामेनापकृष्टप्रदेशाग्रमाणेनत्वगुण
श्रेणिरवस्थितायामवतिष्ठते। अधस्तनाशेषं गुणश्रेणिनिर्जरास्य इयं गुणनिर्जराऽसंख्यातगुणत्वेन प्रवर्त्तते सकषायपरि
णामनिबंधनगुणश्रेणिनिर्जरायाः अकषायपरिणामनिबद्धगुणश्रेणिनिर्जरायाऽसंख्यातगुणत्वस्य युक्तियुक्तत्वा
त्। दीयमानदृश्यमानयोः विशेषनिरूपणं दर्शनमोहक्षपणायां सम्यक्त्वस्य यथा प्ररूपितं तथैव घातित्रयस्या
पि कर्त्तव्यम्। अत्र क्षीणकषायस्य प्रथमसमयादारभ्यान्तर्मुहूर्त्तकालं प्रथमशुक्लध्यानं प्रवर्त्तते स्वकालस्य संख्याते
कभागमात्रं चरमभागे द्वितीयशुक्लध्यानं प्रवर्त्तते सुविशुद्धशुक्लध्यानपरिणामेन विनाएकस्मिन्नपि क्षपणायाः कारणत्वा ७४
त्। अत्र प्रकृतश्लोकद्वयं। शांतक्षीणकषायस्य पूर्वज्ञस्य त्रियोगिनः शुक्लाद्यं शुक्ललेश्यस्य मुख्यसंहननस्य तत्॥१॥ द्वितीय
स्याद्यवत्सर्वं विशेषस्त्वेकयोगिनः विघ्नावरणरोधार्द्धं क्षीणमोहस्य तत्स्मृतं॥२॥ अनेन क्रमेण संख्यातसहस्रस्थितिकांडक
निहत्वा क्षीणकषायकालसंख्यातैकभागावशिष्टे घातित्रयस्य चरमस्थितिकांडकमंतर्मुहूर्त्तायामेन लांछन क्षीणक
षायशेषाकालप्रमाणनिषेकान् तत्प्रथमसमये क्षीणकषायनिक्षिप्तगुणश्रेणिशीर्षस्याग्रमादिं कृत्वाऽधःसंख्या १
तैकभागमात्रगोपुच्छसमूहेन सहोपरिसंख्यातगुणगोपुच्छस्थितीश्चरमकांडकाकारेण लांछति। अत्र दीयमानप्रबंधप्रक्रू

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भाषितं क्षपणाप्रसंगोसंगत एव प्रथमपक्षनिक्षिप्तक्षपणमपि अद्दृक्ष्येक्षलक्षितं कृतः क्षीणकषायस्य चरमसम
ये सकलनिगोदजीवानां निःशेषविश्लेषसंभवात् क्षीणकषायस्य प्रथमसमये बादरनिगोदा अनंता म्रियंते द्वितीय
समयेऽधिकप्रमाणं प्रथमसमयमृतजीवानामावल्यसंख्यातैकभाग... एवं तृतीयादिष्वपि समयेषु विशेषाधिका
म्रियंते यावत् क्षीणकषायस्य काले प्रथमसमयादारभ्यावलिपृथक्त्वं गच्छति तावत् ततः परिसंख्यातभागेन संख्यातभा
गेनाधिका म्रियंते यावत् क्षीणकषायस्य काले आवल्यसंख्यातैकभागमात्रमवशिष्यते तावत् ततः परितनानंतरसमये
ऽसंख्यातगुणिता म्रियंते गुणकारप्रमाणं पल्यासंख्यातैकभागमात्रं विशेषाधिकमरणकालचरमसमयमृतजीवेभ्यस्त
स्य योग्यपल्यासंख्यातैकभागेन गुणिते गुणश्रेणिमरणकालप्रथमसमयमृतजीवप्रमाणं जायते इत्यभिप्रायः एवं गु
णश्रेणिमरणकालद्वितीयसमयात् प्रभृति यावत् क्षीणकषायस्य चरमसमयस्तावदसंख्यातगुणा असंख्यातगुणा म्रियंते
गुणकारः सर्वत्रापि पल्यासंख्यातैकभागमात्र एव शुक्लध्यानेन प्रतिसमयमनंतानंतजीवराशेर्मरणे सति क्षीणकषा
यस्य यथाख्यातचारित्रसिद्धेरभावात् मुक्तिप्राप्तिः कथमिति नाशंकनीयं शुक्लध्यानेनैषामुत्पत्तिनिरोध एव न मरणं त ९४
र्हि कृतो भवतीति चेत् स्वायुःक्षयवशात् तथा हि क्षीणकषायस्य काले प्रथमसमयात् प्रभृति बादरनिगोदजीवा उत्प

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वः घातिकर्मवदघातिकर्मणामपि कर्मत्वेन विशेषाभावात् क्षीणकषायचरमसमये निरवशेषप्रक्षयः कथं न जा
यत इति नाशंकनीयं घातिकर्मवदघातिकर्मणां विशेषघाताभावात् सत्त्वकृतः घातिकर्मवदेषामप्रशस्ततरत्वा
भावात् यथैव हि घातिकर्मत्वाविशेषेपि मोहनीयस्यात्यप्रशस्तत्वात् प्रागेव सूक्ष्मसांपरायचरमसमये विनाशो जा
तः तथा कर्मत्वाविशेषेपि घातिकर्मप्रत्यागेन घातिकर्मणामेव क्षीणकषायस्य चरमसमये निर्मूलनप्रक्षयोस्ति
ति सिद्धं क्षय इति किं जीवप्रदेशैः सह बंधपर्यायाएकमिथ्यात्वमुपगतानां बंधकारणप्रतिपक्षमोक्षकारणप्रति
पक्षमोक्षकारणकलापेनैकदेशकृत्स्नात्मनिर्ममिप्राणानां कार्मणस्कंधानां जीवाद्यदसंतविश्लेषणं स एव क्षय इति
यासां जीवात्पृथग्भूता कर्मस्वरूपेण परिणतास्तथापि कर्मत्वजलीनां अकर्मस्वरूपेण विनाशाभावात् अत्र प्रवर
प्रशस्यप्रबलप्रसन्नप्रभूतप्रतिभाप्रकाशप्रकर्षप्रयुक्तः प्रवचनप्रगल्भप्रतिपाद्यः प्रमाणप्रतिपन्नप्रश्नप्रपंचयति
क्षीणकषायस्य शरीरं बादरनिगोदजीवैराश्रितमनाश्रितं वा आश्रितपक्षे सयोगकेवलिशरीरमपि निगोदाश्रितं जाये
त क्षीणकषायस्यैव सयोगिकेवलिनस्तत्वनात् अनाश्रितं चेत् भूजलवह्न्यनिलजाः केवलिसाहारदेवनैरयि
काः न निगोदाश्रितदेहाः तदाश्रितांगास्ततः शेषाः इत्यागमेन विरोधो न चेत् द्वितीयपक्षस्यानपगमनात्तत्पक्ष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मेकमनंतंत्रिकालसर्वार्थयुगपदवभासि।निरतिशयमत्यक्षतमव्यवधानंचकेवलज्ञानं।केवलदर्शनस्यापिस्वरू
पनिरूपणमेवमेव।केवलज्ञानोत्पत्तिसमकालमेवस्वावरणात्यंतपरिक्षयेणोद्भूतस्यसकलपदार्थविलोकनस्वभावस्यद
र्शनोपयोगस्याप्यानंत्यविशेषणविशिष्टकेवलव्यपदेशस्यसुघटनात्।चंद्रेशीतस्पर्शधवलवर्णयोर्युगपत्प्रवर्त्तनवत्।जि
नेंद्रचंद्रेपितौद्वावुपयोगौयुगपत्प्रवृत्तावितिज्ञातव्यौ।वीर्यांतरायकर्मनिर्मूलप्रक्षयेणाविर्भूतंअप्रक्रमाद्यवस्थाविरोधि
निरंतरप्रवृत्तमप्रतिहतसामर्थ्योपेतंवीर्यमनंतवीर्यमित्युच्यते।तच्चानंतपदार्थपरिच्छेदकत्वोपयोगपरिणामप्रवृ
त्तावपिखेदाभावलक्षणोपकारकारित्वादस्यसर्वज्ञस्यसफलमेव।अन्यथातदुपयोगस्यास्मदाद्युपयोगवत्सामर्थ्यविरहे
णनिरंतरप्रवृत्त्यभावप्रसक्तेरप्रवृत्तिर्नवेत्।अयमर्थःपूर्वाचार्यैरप्युक्तःतत्ववीर्यविघ्नविलयेनसमस्तवदनंतवीर्यतातव
सकलभुवनाधिगमप्रवृत्तिस्वशक्तिरिवस्थितोभवान्।इत्यनेनैवानंतसुखस्वरूपमपिनिरूपितं।तद्यथा।अनंतज्ञान
दर्शनवीर्यपरिवर्द्धितसामर्थ्यस्यज्ञानवैराग्यातिशयपरमकाष्ठाधिष्ठितस्यजिनेंद्रस्यात्मोपादानसिद्धातींद्रियनिःप्रति
पक्षनिरतिशयपरमानंदस्वरूपानाकुलत्वलक्षणानंतसुखस्यतदविनाभूततयाप्रादुर्भवनात्।अनेनैवासातवेदनी ८५
योदयसद्भावेनसयोगकेवलिनिअनंतसुखाभावंतदनुयायिकवलाहारप्रवृत्तिंचप्रतिपादयन्प्रतिवादीप्रत्युक्तःतद्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ध्यंते यावत्तेषां जघन्यायुर्मात्रकालोवशिष्यते तावत्तत्तत्परिधानवशेनतेषामुत्पत्तिर्निरूप्यते ऊतः उत्पन्नजीवानां डी
विकालानामावात् इत्येषः एषामुत्पत्तिर्मृतिश्चस्त्वः इत्तत्परिकेवलं मतिरिव अतः कारणात् पूर्वोक्तदूषणानां लेशस्यापि प्रवे
शाभावः क्षीणकषायस्वरूपोद्योतकसूत्रं निःशेषनष्टमोहः स्फटिकामलभाजनांबुसमचितः क्षीणकषायो भणितो
निर्ग्रंथो वीतरागैः सः ॥१॥ एवं क्षीणकषायस्य चरमसमये सततानुबद्धवज्रविधप्रगुणगुणसंघातघातिकर्मेध[illegible]
यः शुक्लध्यानप्रबलप्रज्वलनज्वालाजालकवलितानि कृत्वा अनंतरसमये परमस्नातकगुणस्थानं प्राप्यानंतकेवलज्ञान
दर्शनवीर्यसुखसंयुक्तो भूत्वा स्वयंभूर्लंकुर्वाणो महात्मा सयोगजिन इत्युच्यते अत्र केवलज्ञानादीनां स्वरूपं निरूप्य
ते। इंद्रियालोकमनस्कारनिरपेक्षत्वादसहायज्ञानं केवलज्ञानं नाम। त्रिकालगोचरानंतसूक्ष्मांतरितविप्रकृष्टाद्यनंतार्थान्
क्रमकरणव्यवधानव्यपेतत्वेन ज्ञानावरणीयकर्मनिरवशेषप्रक्षयेण समुद्भूतं यत् निरतिशायज्योतिः सर्वकालमेकरू
पेणायथावत्तयायुगपदेवसाक्षात्करोतीति तत्केवलज्ञानमिति निश्रायः अस्यानंत्यविशेषणम् अविनश्वरत्वं वक्तुं क्षायिकभाव
स्यसाद्यविपर्यवसितस्वरूपेणावस्थाननियमात् अनंतार्थविषयस्य ज्ञानस्य परमोत्कृष्टानंतपरिणामत्वं निरूपयितुं
वा आनंत्यविशेषणं प्रमेयस्यानंत्ये सति तत्परिच्छेदशक्तीनामप्यानंत्यस्यानुक्तसिद्धत्वात् प्रकृष्टार्थप्रतिपादकसूत्रं क्षायिक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केवललब्धक्रमसुजनितपरमात्मपर्यायः । स्वयखिविधयोगयुक्तावसहायज्ञानदर्शनोपेतः एवमर्जितघातिजातः
सयोगकेवलिजिनो भवति । स भगवान् नागनाकिनायकनिकायविहितनेत्रचमत्कारकारिभूतिस्त्रीलोकशरणभुवनशर
णसमवसरणसारभूमंडलमंडनलोकलक्ष्मीमंडपलक्ष्मीमंडपमध्यमभूतगंधकुटीनाकिकल्पनव्याप्तगणप्रभापान
ल्पपादपमूलपीठिकायमानत्रिपीठाग्रानुलग्नत्रिलोकाधिपत्यशिखरिशिखरायमाणविशिष्टसिंहविष्टरोपरि विभूतेस
कल्याणकारणकल्याणचतुष्टयप्रभूतविभूतिविशेषितआर्यवर्यप्रातिहार्याष्टकविराजितः प्रगुणगुणगणद्वादशगणस
माराधितो निरतिशयचतुस्त्रिंशदतिशयशोभितः समुदितकोटिप्रचंडमार्तंडमंडलमयूखमंडलीसमधिकमरीचिमंडि
तभुवनजननयनानंदजननमहिमहितधातुरहितमलविमुक्तनेत्रकटाक्षसरमोक्षादिदोषोज्झितसमचतुरस्रसंस्थ
ानसंस्थितवज्रवृषभनाराचसंहननसंगतदिव्यगंधपरिमिलितसाष्टसहस्रलक्षणसंज्ञेलक्षितप्रमाणसंस्थितनखकेशोपे
तो निरायुधनिर्भयनिरंबरनिर्भूषणकांतवक्त्रादिगुणनिधानपरमौदारिकशरीरसमलंकृतश्चतुर्विधोपसर्गक्षुधादिपरी
षहरागद्वेषादिसकलदोषगोचरातिक्रांतो गणधरचक्रधरकुलिशधरमुरलधरादिसंपूजितो राजर्षिदेवर्षिब्रह्मर्षिनिषे
वितो जिनेन्द्रचंद्रो निर्दरादिव्यापारव्याहारप्रवृत्तिक्रमः कथमस्तीति चेत् सयोगजिनस्य प्रथमसमये आयुर्वर्जितानां घाति ९६

Ganesh Varni Digambar Jain Institute, Narja, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यातउदयो विद्यमानोपि घातिकर्मोदयसहकारिकारणवैकल्यादुपघातनामकर्मोदयवत्कार्यकर्ता न वेदनी
योदयमात्रस्यैव सद्भावात्। इतरथा समग्रक्षुत्परीषहसद्भावे तदुदयजनितानां पिपासाशीतोष्णदंशमशकचर्याश
य्यावधरोगतृणस्पर्शमलसंज्ञितदशपरीषहाणामप्यविकलसंभवो भवेत् न तथासंति वधरोगपीडाजनितदुःखमपि
जायेत। तस्मिन्सति लाभमिच्छतो मूलोच्छित्तिवत् केवलिलस्याभावोभवति ततः कारणात्केवलिभुक्तिरस्तीति दुराग्रहग्र
स्तमहामुनिवचनं प्रेक्षापूर्वकारिणामुपेक्षार्हमेवात्र अनंतदानलाभभोगोपभोगलब्धयोपि वीर्यग्रहणेनैवोपलक्ष्यंतेत्र
तरायनिरवशेषपरिक्षयजनितात्वस्याविशिष्टत्वात् सकलप्राणिगणविषयाभयदानसामर्थ्यप्रतिबंधाभावात्त्रैलोक्या
धिपत्यप्राप्तिप्रतिबंधापायात् प्रयोजनपक्षे स्वाधीनसमस्तभोगोपभोगवस्तुसंप्राप्तिप्रतिबंधविगमात् तत्रात्र सकला
इति ज्ञातव्यम्। एवं द्विविधमोहनीयप्रक्षयेण तन्नाविनश्वरस्यमपृक्तचारित्रविशुद्धिः ज्ञानदर्शनावरणमूलोत्तरप्रकृति
प्रक्षयानंतरसंजनितक्षायिकानंतकेवलबोधदर्शनपरिणामः अंतरायप्रक्षयसमुद्भूतानंतवीर्यदानलाभभोगोपभो
गसामर्थ्यविस्फोतालिर्नवकेवललब्धिलिर्विराजमानो मुनिः ईर्यापथबंधकारणमनोवाक्काययोगयुक्तत्वात्सयोग इति
जितघातित्वात्तज्जिन इति बोध्यते तत्स्वरूपनिरूपकसूत्रद्वयं केवलबोधदिवाकरकिरणकलापप्रणाशितात्रानानव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सातीतदोषरहितमधुरमनोहरगंभीरदिव्यध्वनिनाआसन्नभव्यलोकस्यसकलसंसारदुःखापहारकूपाराव
वर्त्तवर्त्तिजीवजातसमुद्धरणपोतप्रायंसकलाभ्युदयनिःश्रेयससुखकारणंसागारानागारभेदभिन्नंनिर्मलधर्ममुप
दिशन्अबुद्धिपूर्वकंसर्वजीवसमुद्धरणभावनातिशयप्रेरितोविनेयजनपुण्येनयथोचितधर्मदेशेत्रिलोकाधिपती
नामभिगमनीयोऽर्चनीयःस्तवनीयोवंदनीयोनमस्करणीयोमूलाज्ज्ञानावरणादिकर्मणांनिश्चयव्यवहारापायातिशय २
नंतरप्रादुर्भूतातिशयवानुदत्तसकलसाम्राज्यलक्ष्मीवल्लभःप्रशस्तविहायोगतिसंज्ञपेरंप्रदामूतलंहतोमूर्वाङ्क
ष्टनदिशोनपूर्वकोटिकालंश्रीविहारंकरोति।अत्रतीर्थकरकेवलिनोजघन्यश्रीविहारकालोवर्षपृथक्त्वंसाल्पहृदोऽलि
संधिरहितोपिपरार्द्धंसंपादनसामर्थ्येनाद्धिनाम्नीसंपादयतितथैवनिष्ठितार्थार्हत्परमेष्ठ्यप्यबुद्धिपूर्वकमेवपरार्थ
प्रवृत्तिस्वात्माभावाविश्वकल्याणमितिसिद्धिनिमित्तकायवाग्व्यापारव्याप्तोभवति।यथाभ्रेजलवृष्टिकरणे
भिसंधिरहितोऽपिनियतकालेवृद्धसतंगच्छस्वभावेनकरोतितथैवजिनवरेभ्योपिविकीर्षालाविपियोगपकालिप्रादुर्भूयदि
व्यवचनैरोचित्येभव्यधर्ममभ्युदयादिसंपादयतीति।पूर्वोक्तप्रवचनस्यावकाशोऽस्तीतिनेवंवाच्यं।सजिनभास्करःश्रीविहारभव ९७
रतलेनकिन्नरसुरनिकरविरचितपंचवर्णकमलभ्रान्तिद्युतिकमलानामुपरिश्रयन्नलाविपिस्खलावातिशायेनप्रवर्त्तते

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुष्टयद्रव्यमुपकृष्य पूर्वोक्तक्रमेण निक्षिपन् उदयनिषेके स्तोकं ददाति अनंतरनिषेकेऽसंख्यातगुणं इत्यसंख्यात
गुणश्रेणिं निक्षिपति यावद्गुणश्रेणिशीर्षं तावत् ततउपरि तदनंतरस्थितावसंख्यातगुणं ददाति ततउपरि विशेषही
नं निक्षिपति यावदतिस्थापनावलिं न प्राप्नोति तावत् अत्र क्षीणकषायेण गुणश्रेणिनि[क्षेप]समयप्रबद्धद्रव्यात्सयो
गकेवलिना अपकृष्यमाणद्रव्यमसंख्यातगुणं तद्गुणश्रेणिनिक्षेपायामात् एतद्गुणश्रेणिनिक्षेपायामः संख्यातगुणहीन इ
ति ज्ञातव्यं छद्मस्थपरिणामात् केवलपरिणामस्यापि अनंतविशुद्धत्वात् द्वितीयसमयेपि उदयस्थितौ स्तोकं ददाति द्वितीय
स्थितावसंख्यातगुणं इत्यसंख्यातगुणतया ददाति यावत्प्रथमसमयगुणश्रेणिशीर्षं तावत् गुणश्रेणिशीर्षादनंतरस्थि
तावप्यसंख्यातगुणं ददाति तदुपरितनस्थितावपि असंख्यातगुणं ददाति ततउपर्यतिस्थापनावलिं मुक्त्वा सर्वत्रापि वि
शेषहीनतया ददाति अत्र सयोगजिनस्य प्रथमसमयादारभ्य समुद्घाताभिमुखकेवलिप्रथमसमयपर्यंतं द्रव्येणायामेन
च गुणश्रेणिरवस्थिता इति ज्ञातव्या परिणामेषु प्रतिसमयमवस्थितेषु सत्सु तन्निबंधनद्रव्यापकर्षणगुणश्रेणिनिक्षेपा
यामयोरपि सदृशत्वात् कारणानुविधायि कार्यमिति न्यायेनोचितत्वात् एवं प्रतिसमयमसंख्यातगुणश्रेण्या कर्मप्रदेशा
न् निर्जरयन् योजनान्तरदूरसमीपस्थाष्टादशमहाभाषासप्तशतक्षुद्रभाषापरिणततिर्यग्देवमनुष्यभाषाकारन्यूनाधिक

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सयोगजिनकृतगुणश्रेण्यायामासंख्यातगुणहीनाद्धानमधोऽवतीर्य भवति प्रदेशापेक्षया ततः असंख्यातगुणप्रदेश
विन्याससहितमितियावत् इदं कथं ज्ञायत इति चेत् दर्शनलाभे देशविरते अनंतानुबंधिविसंयोजके दर्शनमोहक्षपके च
त्रमोहोपशामक उपशांतरूपके क्षीणे जिनयोर्द्वयमसंख्यातसंगुणं कालः संख्यातगुणोनस्तु एकादश निर्जराः क्रम
शः इत्येकादशगुणश्रेणीस्वरूपनिरूपकार्षात् ज्ञातव्यं तद्गुणश्रेणिशीर्षादुपरितनानंतरनिषेकेऽपि असंख्यातगुणं द
दातीति तत उपरि सर्वनिषेकेषु विशेषहीनं ददातीत्यावर्जितकरणकालस्य द्वितीयादिसमयेष्वपि गुणश्रेणिनिक्षेप ए
वमस्तीति ज्ञातव्यः अत्र वर्तमानद्रव्यश्रेणिनिरूपणं ज्ञात्वा वदेत् स्वस्थानसयोगकेवलिवत् समुद्घातक्रियाभिमुख
सयोगकेवलिनो गुणश्रेणिनिक्षेपः अवस्थितायामः इति निश्चिनुयात् कुत इति चेत् तत्सयोगद्विचरमस्थितिकांड
कचरमफालिपर्यंतमवस्थितस्वरूपेणायं गुणश्रेणिनिक्षेपायामः प्रवर्तत इति परमगुरुसंप्रदायोपदेशाबलेन मुनिभि
स्तथा तत्स्वस्थानकेवलिनः समुद्घातक्रियाभिमुखकेवलिनश्चावस्थितैकस्वरूपं परिणामविशेषमाश्रित्य अवस्थिते गुणश्रेणि
निक्षेपस्य विसदृशत्वं कथं जातमिति नाशंकनीयं परमवीतरागपरिणामस्य तद्भावेऽपि अंतर्मुहूर्तमात्रायुष्यमपेक्ष्य स ९८
मुत्पन्नानामंतरंगविशेषपरिणामविशेषाणां क्रियाभेदसाधकत्वात् एवमंतर्मुहूर्तकालमावर्जितकरणं गावत्व्यापारख

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिज्ञा तत्संयोगश्चासौ केवलिश्चेत्यसवात॥ अत्र प्रस्कृतस्कृतिः॥ त्रयोदश गुणस्थानं गोदयनगोदितः स्वदेहरोचिरुल्लिङ्गविनेये
लोकस्वक्षरः केवलज्ञानभानुतिन्नघनाज्ञानतमस्ततिः॥ विधूतघातिजीमूतो जयता जिनभास्करः॥ तथा॥ उज्जोलिप्यमान
सकवलकर्मनोकर्मलिदत्तिन्नषद्विधाहारेभ्यः सयोगकेवलिनः कर्मनोकर्माहारावेवस्तः शेषानसंतितत्रापियोग
कारणैकसमयस्थितिकसातकर्मसमयप्रबद्धबंधः सर्वकालमप्यस्तिऔदारिकशरीरनामकर्मोदयकारणकसुव
र्णसुगंधसुरससुस्पर्शयुक्तगलितावशेषायुर्मात्रस्थितिशरीरोपचयनिमित्तनोकर्मप्रतिबद्धसमयप्रबद्धबंधः प्रतरलो
कपूरणप्रतरसंज्ञितसमुद्घातसमयत्रयं विनाशेषसर्वसमयेष्वप्यस्ति केवलिसमुद्घातं तदा करोति तत्स्वरूप
लक्षणं कथ्यते यदा निजायुः अंतर्मुहूर्त्तमात्रावशिष्टं तदा केवली प्रथमतः आवर्जितकरणं करोति। आवर्जितकरणमि
ति समुद्घातक्रियाभिमुखभावस्थानं तत्र अंतर्मुहूर्त्तकालं करोति। अंतर्मुहूर्त्तकालआवर्जितकरणप्रवृत्तिनेवितसमुद्
घातक्रियाभिमुखीभावस्यासंभवात्। तदा नामगोत्रवेदनीयानां प्रदेशपिंडमपकृष्य पूर्वोक्तक्रमेणोदयनिषेके प्रदेशाप
चयं स्तोकं ददाति तदनंतरनिषेके असंख्यातगुणं ददाति एवमसंख्यातगुणश्रेण्या निक्षिपन्गच्छति यावत् शेषयोगाऽयो
गकालाद्विशेषाधिकस्वरूपावस्थितगुणश्रेणिशीर्षं तावत् ततः गुणश्रेणिशीर्षतदनंतराधस्तनसमयेवर्त्तमानस्वस्थान

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदुत्पत्त्यर्थना। अस्मिंस्समुद्घाते वर्त्तमानकेवलिनः इतरयोगसंभवाभावादौदारिककाययोग एवास्ति॥ अत्र व
र्त्तमानकेवलिनः क्रियमाणकार्यविशेषः कइतिचेत्। एकसमये एककेवलिसमुद्घातमाहात्म्येनायुर्वर्जितघा
तिकर्म्मणां तत्कालोपलभ्यमानपल्यासंख्यातैकभागमात्रस्थितिसत्त्वासंख्यातबहुभागं हत्वाऽसंख्यातैकभागं स्था
पयति। तत्राप्रशस्तप्रकृतीनां क्षीणकषायचरमसमये घातितावशेषितानुभागसत्त्वस्यानंतबहुभागं हत्वाऽनंतैकभा
गं स्थापयति। प्रशस्तप्रकृतीनां स्थितिकांडकघात एवानुभागकांडकघातो नास्ति। गुणश्रेणिनिर्ज्जराऽऽवर्जितकरणव
त्प्रवर्त्तते किमपि विशेषो नास्ति। एवं दंडसमुद्घातं कृत्वा तदनंतरसमये कपाटसमुद्घातं करोति। तद्यथा। पूर्वाभिमु
खः कायोत्सर्गेण कपाटसमुद्घातं कुर्वन् केवली देशोनचतुर्दशरज्ज्वायामेन सप्तरज्जुविष्कंभेन द्वादशांगुलबाहल्ये
न कपाटसमुद्घातं करोति। पूर्वाभिमुखो भूत्वा पल्यंकासनेन कपाटसमुद्घातं कुर्वतोपि विष्कंभायामौ प्राग्वद् बाह
ल्यं षड्विंशदंगुलप्रमितं कपाटं यथा बाहल्येन स्तोकं विष्कंभायामाभ्यां प्रवृद्धं तथा तदवस्थायां वर्त्तमानकेवलिनः औदा
रिकमिश्रकाययोगः कार्म्मणौदारिकशरीरद्वयावष्टंभेन तत्र जीवप्रदेशानां परिस्पंदपर्यायप्रवृत्तिसद्भावात्। एवंविधमाप
तकेवलिक्रियमाणकार्यविशेषः क इति चेत्। आयुर्वर्जितघातिचतुष्टयस्य घातितावशिष्टपल्यासंख्यातैकभागमात्रस्थि ९९

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वंधमतीत्यतत्कारणकालनिष्ठापनानंतरसमयेकेवलिसमुद्घातंकरोति केवलिसमुद्घातइतिकिं अघातिकर्म्मस्थि
तिसमीकरणनिमित्तंसमयाविरोधेनकेवलिजीवप्रदेशानामूर्द्ध्वाधस्तिर्यग्विसर्पणंकेवलिसमुद्घातइत्युच्यते सके
वलिसमुद्घातःदंडकपाटप्रतरलोकपूरणभेदेन [illegible] तत्रदंडसमुद्घातस्वरूपमिदं अंतर्मुहूर्त्तायुष्यव
शिष्टेपूर्वाभिमुखः उत्तराभिमुखोभूत्वापल्यंकासनेनकायोत्सर्गेणवाकेवलिसमुद्घातंकरोति तत्रकायोत्सर्गेणदं
डसमुद्घातकरणक्रमोयं उत्कृष्टावगाहविशिष्टकेवलिशरीरोत्सेधः अष्टोत्तरशतप्रमाणप्रमाणांगुलप्रमितः १०८ त
न्नवमभागोव्यासः १२ व्यासंषोडशासहितंत्रिरूपरूपैर्लब्धं त्रिगुणव्याससमेतंसूक्ष्मादपिविविधितंसूक्ष्मं इतिसूत्रेणास्यसू
क्ष्मपरिधावानीतेसप्तविंशदंगुलानिपंचनवतित्रयोदशाशततमभागश्चलभ्यते ३७।९५ अनेनपरिधिप्रमाणेनदेशोनचतु
र्दशरज्जूत्सेधेनदंडाकृत्याजीवप्रदेशानांनिर्गमनंदंडसमुद्घातोनामदेशो ११५ नप्रमाणधस्तनोपरितनलोकपर्यंत
